अथ

अखिलमहीमहेन्द्रनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवसम्पादितोऽयम् ।

अद्भुतसागरः ।

आवृत्तानागतातीतसूक्ष्मसाक्षात्प्रदर्शनम् ।
परं ज्योतिरिवानन्तं ज्यौतिषं तदुपास्महे ॥

नृपकोटिकिरीटरोचिरंशुक्षपनप्रांशुनखांशुमञ्जरीकैः ।
'चरणैर्धरणीं प्रसाधयन्तो वि'*यदोजोऽधिकमासतेन्दुवंश्याः ॥

भुजातेजस्तेषामियमसहमानेव वसुधा
द्विधा भावं-भावं नवशकलभावं गतवती ।
यशोलेपानां तद्विलसितमहो नेयमभवद्-
विदीर्णब्रह्माण्डस्थविरपिठरीकर्परपुटः ॥

भुवः काञ्चीलीलाचतुरचतुरम्भोधिलहरी-
परीताया भर्त्ताऽजनि विजयसेनः क्षितिशकुले ।
यशोभिर्यस्यापि प्रचितभुजतेजःसहचरैः
शशोभिः शोभन्ते परिधिपरिणीता इव दिशः ॥

[illegible]धिकः ककुभां भुजङ्गः संग्रामरङ्ग इव जङ्गमतामुपेतः ।
[illegible]धिन्वेशयशाहितश्रीर्वल्लालसेन इति भूमिपतिस्ततोऽभूत् ॥

[illegible]म्या तुलयामि कातरशतं पान्त्या नृणां तं सुरं
[illegible]जिविच्चुम्बितां स सकलां धत्ते सदोस्सम्पदम् ।

*पुस्तकेषु विकलोऽयं श्लोकः पूर्वापरार्धसङ्गत्या कोष्ठान्तर्गतपदसंरक्षणेना-
[illegible]पि बहुत्र स्थलेषु लेखकव्यामोहिताः पाठा यथामति शोधिता अपि
[illegible]थाऽऽलोच्य सर्वजनाह्लादकान् प्राचीनलिखितपुस्तकवर्णानुसारांस्ता-
[illegible]शोध्य कृपयाऽवधेयं विज्ञाप्याः ।

Power C.

यस्याङ्घ्रिः पतिभैक्ष्यकाकुविलुठद्विद्वेषिनारीशिरः-
सिन्दूरोत्करमुद्रितो जनलिपिर्निर्मुक्तियन्त्रं द्विषाम् ॥
मन्दारोदयसेवितोऽपि न गिरिभ्रान्त्याऽतिभूतः क्व चिद्-
व्यक्तग्राहविचेष्टितोऽपि विततो नक्षत्रवीथीवलैः ।
आपन्त्राणपरायणक्षितिभृतां तुङ्गैरनङ्गीकृतः
सर्वत्राद्भुतसागरोऽवनिभृता तेनायमारभ्यते ॥
मीमांसालयमांसलस्मृतिपरामर्षप्रकर्षस्फुरद्-
वेदाङ्गागमतत्त्वनिस्तुपमतिर्निःशङ्कपृथ्वीपतिम् ।
युक्तायुक्तनिरूपणप्रणयिनं प्रीत्या महीनाथनं
वंशोत्तंसमहार्घरत्ननिलयश्रीः श्रीनिवासं व्यधात् ॥

ज्योतिर्विदार्यवचनानि विचार्य तेषां तात्पर्यपर्यवसितो ग्रथनानुपूर्व
विप्रप्रसादनवशादवसादबुद्धिर्निःशङ्कशङ्करनृपः कुरुते प्रयत्नम्

ग्रन्थेऽत्र वृद्धगर्गगर्गपराशरवशिष्ठगार्गीयान् ।
बार्हस्पत्यबृहस्पतिकठश्रुतिब्रह्मसिद्धान्तान् ॥
आथर्वणाद्भुताशितपट्त्रिंशद्ब्राह्मर्षिकृतीः ।
गार्गीयमतौशनसे कालावलिसूर्यसिद्धान्तौ ॥
विन्ध्यवासि-वदरायणोशनःशालिहोत्रविधुगुप्त*सुश्रुतान् ।
पीलुकार्यनृपपुत्रदेवलान् भार्गवीयविजवायकाश्यपान् ॥
नारदमयूरचित्रे चरकं यवनेश्वरस्य मतम् ।
निखिलं वराहमिहिराचार्यग्रन्थं वसन्तराजकृतिम् ।
मार्कण्डेयपुराणं स्कान्दं भागवतमाग्नेयम् ।
पाद्मं मत्स्यपुराणं रामायणभारताख्याने ॥

* विष्णुगुप्त इति ।

हरिवंशविष्णुधर्मोत्तरे निबन्धं चरिष्यमाणं च ।
वचनं तेषां सारान् बहुशोऽथान्वीक्ष्य सोऽद्राक्षीत् ॥
विषमपदत्वाच्छतशो विरुद्धवचनार्थभेदपरिशुद्धिः ।
पुनरुक्तिलिखनतोऽस्मिन् बहुशो बहुसम्मतिर्ग्राह्या ॥
अद्भुतलक्षणमद्भुतविषयविवेकोत्पत्तिहेतुम् ।
अभिधायादावद्भुतफलपाकस्थाननिर्देशम् ॥
दिव्याश्रयेऽत्र रविशशिराहुमहीनन्दनेन्दुतनयानाम् ।
सुरगुरुभार्गवभानुजकेतुध्रुवकुम्भसम्भवाद्यानाम् ॥
ग्रहयुद्धाकृतियोगाद्यादित्याद्यब्दवत्सरर्क्षाणाम् ।
अद्भुतशान्तीर्वक्ष्यत्यावर्त्तैः पञ्चदशभिः सः ॥
प्रतिरविपरिधिसुरधनुर्भादण्डाकाशनगराणाम् ।
निर्घातसन्ध्ययोर्दिग्दाहच्छायान्धकारधूमानाम् ॥
रेणोर्नीहारोल्काविद्युन्मरुदभ्रजलदगर्भाणाम् ।
वृष्ट्यतिवृष्टिकबन्धप्रभृतीनामद्भुतानि तह शान्त्या ॥
नाभसमाश्रयमध्यममभिधाताऽष्टादशावर्त्तैः ।
क्षितिभैद्यकाकुविलुठद्वैरिवधूवाष्पधौताङ्घ्रिः ॥
भूकम्पजलाशययोर्वह्नेर्दीपसुरशक्रकेतूनाम् ।
क्षितिरुहलताफलकुसुमशस्यान्नव्यञ्जनादीनाम् ॥
गेहोपस्करवस्त्रोपानच्छयनासनास्त्रनगराणाम् ।
दिव्यस्त्रीनरदर्शनमानुषपिटकोदयादीनाम् ॥
क्षेमैकरिष्टदन्तप्राणिप्रसवादिसकलशकुनानाम् ।
गोनामृगविहगादेर्गजस्य तुरगस्य वृषभस्य ॥
मूषिकशत्रोः शरभासमुन्द्रवानां शृगालस्य ।

पल्लयाः पिपीलिकायाः खञ्जनकस्याथ पोतक्याः ॥
एवं मेचकपेचकध्वाङ्क्षाणां चाद्भुतानि सह शान्त्या
भौमाश्रयनभिवक्ता त्र्यधिकैः षट्त्रिंशदावर्त्तैः ॥
अथ दिव्यदिव्यनाभसनाभसभौमान्तरिक्षभौमाख्यान्
दिव्यान्तरिक्षभौमाभिधानसौमिश्रकोत्पातान् ।
आवर्त्तैरभिधाता मिश्रकमध्याश्रयं पङ्क्तिः ॥
शाके नवाष्टखेन्द्वा-१०८९ख्य आरेभेऽद्भुतसागरम् ॥
गौडेन्द्रकुञ्जरालानस्तम्भबाहुर्महीपतिः ।
ग्रन्थेऽस्मिन्नसमाप्त एव तनये साम्राज्यलक्ष्मीं मुदा
दीक्षापर्वणि दक्षिणे निजकृतेर्निष्पत्तिमस्यापयत् ।
नानादानतिलाम्बुसंवलनभं सूर्यात्मजासङ्गमं
गङ्गायां विरचय्य निर्जरपुरं भार्यानुयातो गतः ॥
श्रीमल्लक्ष्मणसेनभूपतिरतिश्लाघ्यो यदुद्योगतो
निष्पन्नोऽद्भुतसागरः कृतिरसौ वल्लालभूमीभुजः ।
ख्यातः केवलमर्णवः सगरजस्तातस्य तत्पूरण-
प्रावीण्येन भगीरथेन भुवनेष्वद्यापि विद्योतते ॥

अथाद्भुतनिरूपणम् । तत्र वृद्धगर्गः ।

अभूतपूर्वं यत् पूर्वं यत् पूर्वं जायतेऽन्यथा ।
तदद्भुतमिति प्रोक्तं नैमित्तं स्यान्निमित्तजम् ॥

एवं बार्हस्पत्येऽपि । अभूतपूर्वं यल्लोकस्य पूर्वं भवति पूर्वं च यदन्यथा तदद्भुतम् । तच्च द्विविधम् । नैमित्तमनैमित्तं च । केतूदयादिना निमित्तेन यद्भूतं तन्नैमित्तम् । तच्छुभाशुभसूचकम् । इतरदनैमित्तम् । तच्च द्विविधम् । शुभसूचकं अशुभसूचकं च । यदशुभसूचकं स उत्पातः ।

यदुक्तं बार्हस्पत्ये ।

प्राग्विनाशाय संप्रोक्तो योऽन्योत्पात इति स्मृतः ।

उद्वेगकारि मर्त्यानां यदप्रीतिविवर्धनम् ॥
अहितत्वादनिष्टत्वाच्छब्दाः पर्यायवाचकाः।

अतोऽन्यान्यप्यशुभसूचकान्युत्पातेष्वन्तर्भवन्ति। अत "यद्य यः प्रकृतिविपर्यासः यः संक्षेपतः"-इह वटकणिकायां वराहेण प्रायःशब्दः प्रयुक्त इति।

अथोत्पातविवेकः। तत्र पराशरः।

प्रकृतेर्भूतविकृतप्रादुर्भावाँश्चोत्पातमाचक्षते। तेषां द्यौरन्तक्षं भूरेताश्चाश्रयः पञ्चमहाभूतानि योनिः।

अतो गर्गः।

प्रकृतेरन्यथोत्पातः संक्षेपस्तावदीदृशः।
त्रिविधः स तु विज्ञेयो दिव्यनाभसभूमिजः ॥

वटकणिकायाम्।

यः प्रकृतिविपर्यासः प्रायः संक्षेपतः स उत्पातः।
क्षितिगगनदिव्यजातो यथोत्तरं गुरुतरो भवति ॥

आथर्वणाद्भुते।

प्रकृतिविरुद्धमद्भुतमपीदं प्राक्प्रबोधाय देवाः सृजन्ति-इति।

अथोत्पातोत्पत्तिकारणम्। मत्स्यपुराणविष्णुधर्मोत्तरयोः।

"पुरुषापचारान्नियतमपरज्यन्ति देवताः।
ततोऽपरागाद्देवानामुपसर्गः प्रवर्त्तते"* ॥

गर्गसंहितायां बार्हस्पत्ये च।

अतिलोभादसत्याद्वा नास्तिक्याद्वाऽप्यधर्मतः।
नरापचारान्नियतमुपसर्गः प्रजायते ॥
ततोऽपचारान्नियतमपरज्यन्ति देवताः।
ताः सृजन्त्यद्भुतान् भावान् दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्मिताः।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च ॥

* मात्स्ये २२९ अ, ५ श्लो.।

येषु शान्तिं प्रकुर्वन्ति न ते यान्ति पराभवम् ।
ये तु न प्रतिकुर्वन्ति क्रियया श्रद्धयाऽन्विताः ॥
नास्तिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात् ।

अथ त्रिविधाद्भुतविवेकः । मत्स्यपुराणविष्णुपुराणधर्मोत्तरयोः ।

"दिव्यान्तरिक्षं भौमं तु त्रिविधं परिकीर्त्तितम् ।
ग्रहर्क्षविकृतं दिव्यमान्तरिक्षं निबोध मे ॥
उल्कापातो दिशां दाहः परिवेषस्तथैव च ।
गन्धर्वनगरं चैव वृष्टेश्च विकृतिस्तु या ॥
एवमादीनि लोकेऽस्मिन्नान्तरिक्षं विनिर्दिशेत् ।
चरस्थिरभवो भौमो भूकम्पश्चापि भूमिजः ॥
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्"* ।

गर्गसंहितागार्गीयबार्हस्पत्येषु च ।

स्वर्भानुकेतुनक्षत्रग्रहतारार्कचन्द्रजम् ।
दिवि चोत्पद्यते यच्च तद्दिव्यमिति कीर्त्तितम् ॥
वाय्वभ्रसन्ध्यादिग्दाहपरिवेषतमांसि च ।
खपुरं चेन्द्रचापं च तद्विद्यादन्तरिक्षजम् ॥
भूमावुत्पद्यते यच्च स्थावरे चाथ जङ्गमे ।
तदैकदेशिकं भौमं भूमिचालाम्बुविक्रिया ॥

भौमाद्भुतस्य भूगोलोत्पन्नत्वात् सकलभूगोलगामिफलसूचकत्वप्राप्तौ विशेष उक्त तदैकदेशिकमिति । यस्मिन् यस्याधिकारस्तत्रोत्पन्नं तस्यैव शुभाशुभसूचकमित्यर्थः मत्स्यपुराणविष्णुधर्मोत्तरयोः ।

"भौमं चाल्पफलं ज्ञेयं चिरेण च विपच्यते ।
नाभसं मध्यफलदं मध्यकामफलप्रदम् ॥
दिव्यं तीव्रफलं ज्ञेयं शीघ्रकारि तथैव च"† ।

---

* २२९ अ, ६-९ श्लो. ।
† २२९ अ, ९, १० श्लो. । तत्र दिव्यमित्यादि पद्यार्धं नोपलभ्यते ।

पराहसंहितायाम् ।

भौमं चिरस्थिरभवं तच्छान्तिभिराहतं शममुपैति ।
नाभसमुपैति मृदुतां क्षरति न दिव्यं वदन्त्येके ॥

तथा च काश्यपः ।

भौमं शान्तिहतं नाशमुपगच्छति मर्दितुम् ।
नाभसं न शमं याति दिव्यमुत्पातदर्शनम् ॥

बार्हस्पत्ये तु ।

तत्र भौमान्यरिष्टानि व्यावर्त्तन्ते प्रजागुणैः ।
सप्तरात्रात् पराहाद्वा वर्जयन्त्यप्यवर्षणात् ॥
व्रतहोमोपवासैश्च दानैः स्वस्त्ययनैस्तथा ।
अन्तरिक्षाण्यरिष्टानि व्यावर्त्तन्ते कथं चन ॥
अव्यावर्त्तान्यरिष्टानि दिव्यान्याहुर्मनीषिणः ।
बह्वन्नदक्षिणादानैर्महाहोमान् प्रयोजयेत् ॥
प्रशस्तानि च कुर्वीत देवब्राह्मणपूजनम् ।
हिरण्यानां विसर्गाश्च कर्त्तव्या ब्राह्मणेष्वथ ॥
गोदोहश्च शमं याति दिव्योऽपीति मनीषिणः ।

गोदोहश्च शिवायतनभूमौ कर्त्तव्यः ।

[illegible] च गार्गीयवराहसंहितयोः ।

दिव्यमपि शममुपैति प्रभूतकनकान्नगोमहीदानैः ।
रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च ॥

[illegible]यीये तु ।

सावित्र्या लक्षहोमं तु भौमेऽरिष्टे विशारदाः ।
कुर्युर्दैवं च दानं च विप्रेभ्यो यस्य यत् प्रियम् ॥
गोभूमिकाञ्चनाश्वानां रत्नानां धान्यवाससाम् ।
रथानां वारणानां च प्रदानं कामतः परम् ॥
तुष्येयुर्येन वा विप्राः सम्भवो यस्य यस्य हि ।

तत् तत् सर्वमुपादेयमेष दानविधिः स्मृतः ॥
दद्यात् तु गुरवे ग्रामान् धेनुं वा गोयुगं तथा ।
अलङ्कारैश्च संपूज्य प्रीणयेत् प्रीतमानसः ॥
अनेन विधिना भौममद्भुतं शमयेद् गुरुः ।
एष एव विधिर्ज्ञेयो वियत्यप्यद्भुताभ्रये ॥
विशेषोऽत्र तु सावित्र्या दशलक्षं तु होमयेत् ।
होमं समाहितमनाः कुर्याच्च घृतकम्बलम् ॥
धेनूनां द्वादश ज्ञेयं शतं निष्कसमायुतम् ।
गुरवे दीयमानं तच्छमयेदम्बराद्भुतम् ॥
दिव्याद्भुतेषु कर्त्तव्यः क चिद्धोमः समाहितैः ।
गोसहस्रं तु दातव्यं गुरवे दक्षिणाविधौ ॥
एष प्रोक्तो विधिः सम्यग्दिव्यारिष्टविपद्धरः ।
सुभिक्षक्षेमसम्पत्त्या पूजनं पुष्टिवर्धनम् ॥

अल्पफलदिव्योत्पाते च कोटिहोमाशक्तावमृताख्या महाशान्तिः कर्त्तव्या । यदुक्तं गार्गीये ।

प्रयतस्तेषु सर्वेषु दिव्येष्वद्भुतकेष्वपि ।
महाशान्तिं बुधः कुर्यादमृतां विश्वभेषजम् ॥

बार्हस्पत्येऽथर्वस्मृतौ च ।

अद्भुतेष्वपि सर्वेषु त्रिविधेषु न संशयः ।
दिव्यान्तरिक्षभौमेषु अमृता शंसिता बुधैः ॥
सर्वाद्भुतप्रशमनीं सर्वविघ्नविनाशिनीम् ।
शान्तिमेतामृतां कुर्यादायुरारोग्यवर्धनीम् ॥
अमृतायाः प्रभावेण देवाश्चामर्त्यतां गताः ।
तेनामृतां सदा कुर्याद्येनारोग्यमवाप्यते ॥

मत्स्यपुराणे ।

अथातः संप्रवक्ष्यामि त्रिविधेष्वद्भुतादिषु ।
विशेषेण तु भौमस्य शान्तिः कार्याऽमृता भवेत् ॥
अभया चान्तरिक्षेषु सौम्याऽऽदित्येषु पार्थिव ।

विष्णुधर्मोत्तरे ।

सर्वोत्पातप्रशमनी अमृता चाऽभया स्मृता ।
सौम्या चैव महाशान्तिः सर्वकामफलप्रदा ॥
विशेषेण तु भौमेषु शान्तिः कार्याऽमृता भवेत्-इति ।

त्र हित*पुण्यनक्षत्रप्राप्तौ *पुण्याभिषेको वा कर्त्तव्यः ।

ा च वराहसंहितायाम् ।

नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति ।
मङ्गल्यं चापरं नास्ति यदस्मादतिरिच्यते ॥

अथाद्भुतानां फलपाकस्थाननिर्देशः । तत्र पराशरः ।

नृपनृपतिसुतराज्ञीकोषलोकपुरपुरोहितवाहनेष्वेतेषां फलमवर्त्तते ।

त्स्यपुराणविष्णुधर्मोत्तरयोश्च ।

राज्ञः शरीरे लोके च पुरे दारपुरोहिते ।
पाकमायाति पुत्रेषु तथा वै कोषवाहने ॥

दिपरं स्वाम्यादिपरं माण्डलिकगृहस्थादीनामपि फलदर्शनात् ।

ा च गर्गः ।

पुरे जनपदे कोपे वाहने च पुरोहिते ।
पुत्रे स्वामिनि भृत्ये च पच्यते दैवसृष्टया ॥

ष्टयाइदैवम् ।

ातफलपाकस्थानं वटकणिकायाम् ।

दिव्या जगतो देवस्य नाभसाः पार्थिवस्य भूग्रभवाः ।

-इति ग, घ ।

अनुवध्नन्तो भयदास्त्र्यहाधिकश्चानिलश्चण्डः ॥

ननूक्तफलस्याद्भुतस्य कथमशुभाशुभत्वमवगन्तव्यम्। अवगतेऽनुष्ठानमुच्यते। तदभावे पुनरेषां न फलं ज्ञेयमिति।

अथात्र फलगौरवात् प्रथमं दिव्याद्भुतोक्तेः प्राधान्यदोषादित्याद्भुतान्येवाभिधीयन्ते।

शुभसूचकादिकलक्षणमाह पराशरः।

रविर्महान् परिमण्डलः कुक्षिमान् विपुलो घृतमण्डनिभः क्षेमारोग्यकरः सुवर्णरजतपद्मप्रभो विमलः स्निग्धो जगद्धिताय

वराहसंहितायाम्।

अमलवपुरवक्रमण्डलः स्फटिकविपुलामलदीर्घदीधितिः
अविकृततनुवर्णचिह्नभृज्जगति करोति शिवं दिवाकरः

येषामयं स्वामी तेषु विशेषेण शुभकरः। विपरीतो विशेषेण विपरीतकरः रविस्वामिकान्याह यवनेश्वरः।

नृपाटवीशैलसुवर्णताम्रसिंहानलव्याडविषौर्णिकानाम्।
हिंसोग्रवाग्द्रव्यवदुष्णरूक्षद्रव्याकराणां प्रभुरुच्यतेऽर्कः॥

कश्यपस्तु।

प्रागर्धं नर्मदायाश्च शोणाः शवरमागधाः।
भद्रा* वङ्गाः कलिङ्गाश्च वाह्लीका यवनाः शकाः॥
काम्बोजा मेकलाः सुह्माः प्राग्ज्योतिषकिरातकाः
चीनाः सर्वे सशैलेयाः पार्वता बहिरन्तजाः॥
यमुनादक्षिणं कूलं कौशाम्ब्यौदुम्बराणि च।
विन्ध्याटवी च पुण्ड्राश्च वर्धमानं च पर्वताः॥
श्रीपर्वतइन्देपुरं गोलाङ्गुलकमेव च।
इक्षुमत्याश्रिता ये च जनाः शूरा मदोत्कटाः॥

* उद्भ्र इति अ.।

कान्तारमथ गोपाश्च कन्दरास्तस्करास्तथा ।
समरे विषमाः शूरास्तरवः कटुका अपि ॥
क्षुष्पादा भेषजं च धान्यं च भिषजस्तथा ।
अरण्ययायिव्यालाश्च कर्षका व्याडकास्तथा ॥
गैरिकं पद्मकिञ्जल्कं पुंसंज्ञा ये च जन्तवः ।
सर्वेषां भास्करः स्वामी तेजस्तेजस्विनामपि ॥

पौडमिति द्रष्टव्यं वराहसंहितायाम् ।

प्राङ्नर्मदार्धशोणोड्रवङ्गसुह्माः कलिङ्गवाह्लीकाः ।
शकयवनमगधशबरप्राग्ज्योतिषकचीन*काम्बोजाः ॥
मेकलकिरात†पावनबहिरन्तःशैलजाः पुलिन्दाश्च ।
द्रविडानां प्रागर्धं दक्षिणकूलं च यमुनायाः ॥
चम्पोदुम्बरकौशाम्बिचेदिविन्ध्याटवीकलिङ्गाश्च ।
पुण्ड्राश्च गोलाङ्गूलश्रीपर्वतवर्धमानाश्च ॥
इक्षुमतीत्यथ तस्करपारतकान्तारगोण्वीजानाम् ।
क्षुपधान्यकटुकतरुकनकदहनविषसमरशूराणाम् ॥
भेषजभिषक्चतुष्पदकृषिकरनृपहिंस्रयायिचौराणाम् ।
व्यालारण्ययशोयुततीक्ष्णानां भास्करः स्वामी ॥

स्निग्धरश्मिविशालश्च प्रकृतिस्थश्च यो ग्रहः ।
ग्रहयुद्धरजोधूमनिर्घातोल्काभिराहतः ॥
न यदा स्वोच्चराशिस्थो मित्रभे स्वगृहेऽपि वा ।
स्थितः शुभग्रहैर्दृष्टः संपुणाति परिग्रहम् ॥

---

* कामीराः-इति ख. । † विटका इति अ. । किरातादिसंस्था इति ख. ।

*स्वमन्यथा हन्ति नित्यं निजनाशं करोति च ।
नृपाणां भयदोऽपि स्यादवृष्टिभयकारकः ॥

स्वतः कृतोऽमात्यकृतो वा नाशो निजनाशः ।
तथा च वराहसंहितायाम् ।

उदयसमये यः स्निग्धांशुर्महान् प्रकृतिस्थितः ।
यदि च न हतो निर्घातोल्कारजोग्रहमर्दनैः ॥
स्वभवनगतः स्वोच्चप्राप्तः शुभग्रहवीक्षितः ।
स भवति शुभस्तेषां येषां प्रभुः परिकीर्त्तितः ॥

अतिविहितविपरीतलक्षणक्षयमुपगच्छति तत्परिग्रहः ।
डमरभयगदातुरा जना नरपतयश्च भवन्ति दुःखिताः ॥

यदि न रिपुकृतं भयं नृपाणां स्वसुतकृतं नियमादमात्यतो वा भवति जनपदस्य चाऽप्यवृष्ट्या गमनमपूर्वपुराद्रिनिम्नगासु ।

अथ प्रकृत्यादिविवेकः ।

तत्र स्वकालिककपिशवर्णरश्मियोगिन्यगणितागतप्रमपायादिस्थानयोगित्वाखण्डलत्वचिह्नादिका प्रकृतिः । प्रकृतिपरीत्यं विकृतिः । स्निग्धनिर्मलत्वगणितागतबिम्बप्रमाणस्फुटविमलामलदीर्घरश्मिजालादयो गुणाः । एतस्माद्विपरीतधाः । प्रकृतिर्गुणदोषरहिता शुभफला । गुणवती अतिबहुला शुभफला दोषवती । विकृतिर्गुणदोषरहिताऽशुभफला । दोबहुशुभफला । तत्र विकृतिप्रकृतिगुणदोषसंख्यावलाबलमाकशुभाशुभफलव्यवस्था कर्त्तव्या ।

अथायनसमये रवेः शुभलक्षणम् । तत्र गर्गपराशरौ ।

अयने सुप्रभः स्निग्धः सेवते यदि भास्करः ।

---

* "स्वकृतो व्याहरन् नित्यं जननाशं करोति च" ।
स्वकृतः स्वसुतकृतोऽमात्यकृतो वा । इति ख, ।

सुवृष्टिं शस्यवृद्धिं च योगक्षेमं विनिर्दिशेत् ॥

अयने इति कर्मपदम्। एवं च ये ये अयने सेवते इत्यर्थः।

श्वेतः शिरीषपुष्पाभः पद्माभो रूक्षमस्तन्निभः।
वैडूर्यघृतमण्डाभो हेमाभश्च दिवाकरः ॥
वर्णैरेभिः प्रशस्तः स्यान्महास्निग्धः प्रतापवान्।
भावनः सर्वशस्यानां क्षेमारोग्यसुभिक्षदः ॥

अयनक्रमो वराहसंहितायाम्।

आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥

तथा च काश्यपः।

सार्पार्धादक्षिणं भानोः श्रविष्ठाद्यं तथोत्तरम्।
कदाचिदासीदयनमुत्पातान्नैव शाश्वतः ॥

तादृशमयनं कदाचिच्छाश्वत एवासीन्न तूत्पातात्।

यदा निवृत्तोऽनुप्राप्तः श्रविष्ठामुत्तरायणे।
आश्लेषां दक्षिणे प्राप्तस्तदा विद्यान्महाभयम् ॥

वचनाच्छ्रविष्ठामिति धनिष्ठाद्यपरम्। आश्लेषामिति आश्लेषार्धपरम्।
श्च।

प्रातौ वैष्णवमुदग्मार्गं प्रतिपद्यते दक्षिणमाश्लेषां वा
।।

वैष्णवं वैष्णवान्तम्। आश्लेषाऽऽश्लेषार्धमिति।
तु विरुद्धं लिखितम्।

सान्ग्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत्।
उल्काभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥

परीक्षणोपायश्च तेनैवोक्तः।

दूरस्थच्छिद्रवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥

उक्तादधिकसमयेऽयननिवृत्तौ विकृतत्वेऽपि शुभमेव फलम् ।

तथा च वृद्धगार्ग्यः ।

अनिवृत्ते समे वाऽपि निवृत्तः शस्यते रविः ।

वराहेण तूत्तरायणमात्र एवैतदुक्तम् ।

तद्यथा ।

उत्तरमयनमतीत्य व्यावृत्तः क्षेमशस्यवृद्धिकरः ।
प्रकृतिस्थश्चाप्येवं विकृतगतिर्भयकृदुष्णांशुः ॥
अप्राप्य मकरमर्कों विनिवृत्तो हन्ति सापरां याम्याम्
कर्कटकमसंप्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम्-इति ॥
सकलवसुधाधिनाथश्रीमल्लालसेनदेवेन ।
अयनद्वयं यथा तत् परीक्ष्य संलिख्यते सवितुः ॥
इदानीं तद्विसंवादादयनं दक्षिणं रवेः ।
भवेत् पुनर्वसोरादौ विश्वादावुत्तरायणम् ॥
अप्राप्य विश्वमर्कों विनिवृत्तो हन्ति सापरां याम्याम्
आदित्यमसंप्राप्तो विनिवृत्तश्चोत्तरां सैन्द्रीम् ॥

पराशरश्च ।

वैश्वादुत्तरेऽप्ययनविभागो बोद्धव्यः ।

तथा च स्वकालिकमृतुक्रममाह पराशरः ।

तस्य श्रविष्ठाद्यात् पौष्णान्तं चरतः शिशिरः । वसन्त
र्धाद्रोहिण्यन्तम् । सौम्यात् सार्पार्धं ग्रीष्मः । प्रावृट् सार्पा
न्तम् । चित्राद्यादिन्द्रार्धं शरत् । हेमन्तो ज्येष्ठार्धाद्वैष्णवान्त

तस्येति सवितुरिति सम्बन्धः । वराहकालिक ऋतुक्रमस्तु पञ्चसिद्धा

उदगयनमकरादावृतवः शिशिरादयश्च सूर्यवशात
द्विभवनकालसमाना दक्षिणमयनं च कर्कटकात

ब्रह्मसिद्धान्ते च ।

द्वौ द्वौ राशी मकरादृतवः षट् सूर्यगतिवशाद्ग्राह्याः ।
शिशिरवसन्तग्रीष्मवर्षाशरदः सहेमन्ताः ॥

इदानीं पुनरयनक्रमेण व्यवस्थोच्यते ।

धनुषो विंशत्यंशात् षष्ठांशकभोगसंमिता ऋतवः ।
शिशिराद्याः षट् क्रमशः सम्प्रत्ययनक्रमेण रवेः ॥

अथ वर्णफलम् । तत्र पराशरः ।

शिशिरे ताम्रः कपिलो वा । वसन्ते कौङ्कुमो वा हरितः ।
कपिलवैडूर्यः । प्रावृषि सर्ववर्णः । शरदि पद्माभः । हेमन्ते
ः । सर्वर्तुश्वेतः पाण्डुवर्णश्च प्रशस्यते । विपरीतो विपरी-
।

त्र गर्गसम्मतिरप्यस्ति । वृद्धगर्गेण तु कार्त्तिकादिसंवत्सरं त्रिधा विभज्य ऋतुत्रयं तद्वर्णफलं कार्त्तिकमासद्विकं चोक्तम् ।

यथा ।

हेमन्तग्रीष्मवर्षासु रक्तः पीतः सितः शुभः ।
कार्त्तिके मार्गशीर्षे तु रक्तः सूर्यः प्रदृश्यते ॥
पौषे माघे यदा सूर्यो भवेन्माञ्जिष्ठसन्निभः ।
फाल्गुने चैव चैत्रे च लाक्षारुधिरसन्निभः ॥
वैशाखे च तथा ज्येष्ठे गौरः स्यादर्कमण्डलः ।
आषाढे श्रावणे चैव रक्ताभः सुमहद्युतिः ॥
भाद्रौष्ठपद्यामाश्वयुजे वैडूर्यहरितो रविः ।
स्वरूपमेतन्मासेषु वर्णाश्चोक्ता विवस्वतः ॥
स्वरूपे क्षेममारोग्यं विपरीते विपर्ययः ।

वर्णफलं वराहसंहितायाम् ।

ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् ।
हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम् ॥

तथा ।

हितकृद्विप्रादीनां स्निग्धसितरक्तपीतकृष्णोऽर्कः ।
रूक्षस्तद्भयकारी विकारमन्यं गतो यदि वा ॥

पराशरः ।

रविर्विवर्णो भूरिवर्णोऽन्नाभावाय । श्यावो जनमरणाय माभो वृष्टिनिग्रहाय । ताम्रो रुधिराभो वा शस्त्रकोपं करोति षण्ढवर्णो जगतः क्षयाय । व्यामिश्रवर्णो यावत् स्त दृश्यते तावत् स्परविनाशाय । कृष्णरुधिरवर्णो जगत्क्षयकरः । वैडूर्यकृष्ण वर्णः पांशुव*र्णोत्सादकरः ।

वराहसंहितायाम् ।

रुधिरनिभो वियत्यवनिपान्तकरो न चिरात् ।
परुपरजोऽरुणीकृततनुर्यदि वा दिनकृत् ॥
असितविचित्रनीलपरुषो जनघातकरः ।
खगमृगभैरवस्वररुतैश्च निशाद्यमुखे ॥

वियति दशमे मध्याह्न इत्यर्थः । निशाद्यमुखे उदयास्तमयोरसितादि[illegible] तकर इति ।

वृद्धगर्गः । [illegible]ख्यम् ।

उदये नीलवर्णोऽर्को मृत्युरोगकरो भवेत् । [illegible]म् ॥
दुर्भिक्षं कृष्णकपिलः कृष्णादीनां च वर्धनः ॥

कृष्णादीनामिति चोरादीनाम् ।

तथा ।

वैडूर्यवर्णः सलिलं रक्तशस्त्रमुदीरयेत् ।
परुषः कोपयेद्दस्यून् धर्षणं चारुणप्रभः ॥
ताम्रो वह्निभयं कुर्यादग्निवर्णोऽग्निजं भयम् ।

---

* वर्णोत्पातकरः-इति ख. ।

स्मृतो धूमावृतो रूक्षो विरश्मिर्वृष्टिहा रविः ॥

उदयमिति सर्वत्र सम्बध्यते। उदय एव गर्गेणापि वर्णस्याग्निभयकरत्वप्रतिपादनात्।
तथा च तद्वाक्यम्।

उदयेऽग्निशिखाप्रख्यः कुर्यादग्निभयं रविः ।
दृष्ट्वा तं रुधिरप्रख्यं संग्राममभिनिर्दिशेत् ॥

वराहसंहितायाम्।

*श्यावेऽर्के कीटभयं भस्मनिभो भयमुशन्ति परचक्रात् ।

वृद्धगर्गः ।

श्यावे नीले च दुर्भिक्षं रजतार्चिःप्रभेऽशुभम् ।
पीताभे च महाव्याधिः कृष्णे मृत्युभयं भवेत् ॥
अनावृष्टिर्ध्रुवा तत्र षड्भिर्मासैर्न संशयः ।

पराशरः ।

मयूरचन्द्रिकाभो द्वादशवार्षिकीमनावृष्टिं विधत्ते ।

गर्ग्यः ।

मयूरचन्द्रिकाभो वा यदा भवति भास्करः ।
पूर्णे तु द्वादशे वर्षे तदा वर्षति वासवः ॥

नरवराहसंहितयोरप्येवम्। इदं चाशुभवर्णफलाभिधानमृतुस्वभावव्यभिचारेण व्याख्येयम्।

संहितायाम्।

ऊर्ध्वं करोति दिनकृत् ताम्रः सेनापतिं विनाशयति ।
पीतो नरेन्द्रपुत्रं श्वेतस्तु पुरोहितं हन्ति ॥

दिवसकर इत्युत्पले विलिख्य व्याख्यातम्।

चित्रोऽथ वाऽपि धूम्रो रविरश्मिर्व्याकुलीकरोत्युर्वीम्।
तस्करशस्त्रनिपातैर्यदि न सलिलमाशु पातयति ॥

---

*-इति अ.।
र्वम्-इति अ.।

पराशरः ।

रविरश्मयो रूक्षा विच्छिन्नास्तनवो ह्रस्वा धूम्राभा लोहि-
विवर्णा गर्हिताः । स च निष्प्रभो जनमारकरः ।

अस्यार्थः । सप्रभो रविस्तस्य रश्मयो रौक्षादिदोषयुक्ता विगर्हिताः । तथा-
रश्मिषु निष्प्रभो रविर्जनमारकर इति ।

तथा चोत्तरकाण्डे इन्द्रपराजयनिमित्तम् ।

"भास्करो निष्प्रभश्चैव"* ।

वनपर्वणि भीमपराजयनिमित्तम् ।

"निष्प्रभश्चाभवत् सूर्यश्छन्नरश्मिस्तमोवृतः"†—इति
मध्याह्नव्यतिरेकेणैतत् ।

अथ तामसकीलकादिफलम् । वराहसंहितायाम् ।

तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् ।
वर्णस्थानाकारैस्तान् दृष्ट्वाऽर्के फलं ब्रूयात् ॥

गर्गः ।

कृष्णाभाः कृष्णपर्यन्ताः संकुलाः कृष्णरश्मयः ।
राहुपुत्रास्त्रयस्त्रिंशत् कीलकाश्चातिदारुणाः ॥

वराहसंहितायाम् ।

ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्या-
*तेषामुदये रूपाण्यम्भःकलुषं §रजःकृतं व्योम ॥
तरुगणशिखरामर्दी सशर्करो मारुतश्चण्डः ।
ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दा-
निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः ।
न पृथक् फलानि तेषां शिखकीलकराहुदर्शनं यत्
तदुदयकारणमेषां केत्वादीनां फलं ब्रूयात् ।

---

* २८ सर्गे २८ श्लो. । † १५५ अ. ३ श्लो. ।
* 'ध्वाङ्क्षवन्धप्रहणरूपाः पायाः शशाङ्केऽपि' । इति अ. अधिकः
§ रजोवृतम् इति अ. ।

यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यविम्बस्थाः ॥
तस्मिन् तस्मिन् व्यसनं महीपतीनां* न संदेहः ।
क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः ॥
निर्मांसबालहस्ताः कृच्छ्रेण हि यान्ति परदेशम् ।
तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासमुकुलिताक्षिपुटाः ॥
सन्तः सन्नशरीराः शोकोद्भववाष्परुद्धदृशः ।
क्षामाजुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः ॥
स्वनृपतिचरितं कर्म न पुराकृतं प्रब्रुवन्त्यन्ये ।
गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः ॥
सरितो यान्ति तनुत्वं क्वचित् क्वचिज्जायते शस्यम् ।

अथ तेषां विशेषफलं गार्गीये ।

ध्वाङ्क्षो वा कृष्णशङ्कुर्वा कबन्धो वाऽर्कमण्डले ।
दृश्यते यत्र तत्राशु भूमिपालो विनश्यति ॥

आग्नेयपुराणे हिरण्यकशिपुवधनिमित्तम् ।

पूर्वापरासु सन्ध्यासु कबन्धो दृश्यते रवौ ।

पर्वणि वृष्णिवंशक्षयनिमित्तम् ।

"उदयास्तमने तस्य पूर्यां नित्यं दिवाकरः ।
व्यदृश्यतासकृत् पुम्भिः कबन्धैः परिवारितः"† ॥
"आदित्यो रजसा राजन् समवच्छन्नमण्डलः ।
विरश्मिरुदये नित्यं कबन्धैः समदृश्यत"* ॥

अनोधनुःक्षेत्ररूपा नृपवित्तक्षयावहाः ।

अनोधनुःक्षेत्ररूपाः । तद्रूपाः धनुःक्षेत्ररूपाश्च ।

* क्षेयम् इति अ. ।
† २ अध्याये १३ श्लो. ।
* अयं श्लोको मुद्रितमहाभारतोक्तस्थाने नोपलभ्यते ।

वराहसंहितायाम् ।

दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने ।
ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे ॥

तथा ।

कीलकदण्डकबन्धध्वाङ्क्षायुधपीठसन्निभाः सूर्ये ।
दुर्भिक्षनृपभयव्याधिचौरयुद्धान्यराज्याय ॥

गार्ग्येऽपि ।

*श्वशृगालाश्वकीलानां तथा धूमकबन्धयोः ।
दर्शनं सूर्यबिम्बे चेद्विनाशो भूपतेस्तदा ॥

वृद्धगार्ग्यः ।

शृगालान् गर्दभान्वाँस्तथाऽन्यान्मृगपक्षिणः ।
आदित्यमण्डले दृष्ट्वा देशभङ्गं विनिर्दिशेत् ॥

क्रव्यादमृगपक्षिदर्शने तु गर्गः ।

मण्डलाभ्यन्तरस्थैश्च क्रव्यादमृगपक्षिभिः ।
परचक्रागमो वाच्यः प्रजानाशस्तथैव च ॥
अहस्करे पताकादीन् प्रासादाँस्तोरणानि च ।
सन्ध्ययोरुभयोः पश्येन्महदुत्पद्यते भयम् ॥

वराहसंहितायाम् ।

राजोपकरणवर्णच्छत्रध्वजचामरादिभिर्विद्धः ।
राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा ॥

वटकणिकायाम् ।

ज्वालास्फुलिङ्गधूमैर्जानक्षयः-इति ।

हरिवंशमत्स्यपुराणपद्मपुराणेषु हिरण्यकशिपुवधनिमित्तम् ।

"अमुञ्चच्चासितां सूर्यो धूमवर्त्तीं महाभयाम्"†

---

* स्वश्वृङ्गविदकीलानाम् इति क. । श्वशृगालार्बुदकीलानाम्-इति ख

† ४६ अ. १० श्लो. हरिवंशे ।

वराहसंहितायाम्

एको दुर्भिक्षकरो ह्याद्याः स्युर्नरपतेर्विनाशाय ।
सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः ॥

उक्तादन्यस्थान् एको दुर्भिक्षकरः । उक्तसंस्थानोऽनुक्तसंस्थानो वा ह्यादिर्नृपविनाशाय । अनुक्रमेण वर्णान् ब्राह्मणादीन् हन्तीत्यनुवर्णघ्नः ।

तथा ।

दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः ।
आगच्छति लोकानां तेनैव भयं प्रदेशेन ॥

ण संस्थानफलम् । तत्र गर्गः ।

खण्डो वा कृष्णवर्णो वा ह्रस्वः पिङ्गलकोऽपि वा ।
आदित्यो दृश्यते यत्र राज्ञो मृत्युं विनिर्दिशेत् ॥

ङ्गलक इति कृष्णमेचकाकृतिः ।
ङ्गर्गः ।

खण्डो वा *कृष्णरेखा वा मुण्डः पिङ्गलकोऽपि वा ।
देशविभ्रममादित्यो राजमृत्युं च सूचयेत् ॥

तत्फलं रूक्षे रवौ वक्तव्यम् ।
ग वराहः ।

खण्डो वक्रः कृष्णो ह्रस्वः काकाद्यैर्वा चिह्नैर्विद्धः ।
यस्मिन् देशे रूक्षश्चार्कस्तस्याभावः प्रायो राज्ञः ॥

।

ाकार उलूकसंस्थान उन्मादापस्मारकृत् ।
: ।

वेरूक्षेण भवेत् क्षेमः स्थालीपिठरसन्निभे ।
नावृष्टिश्च वैरं च संक्षिप्ते सूर्यमण्डले ॥

क्षोऽरुणोऽञ्जनश्यामः सूर्यो वा ह्रस्वमण्डलः ।

णो ह्रस्वमण्डल इत्येकनिमित्तम् । रूक्षोऽञ्जनश्यामो ह्रस्वमण्डल इत्यपरम् ।

रक्त इति ख, ।

तथा ।

निष्प्रभे धूम्रवर्णेऽर्के सर्वतो जायते भयम् ।

गर्गः ।

अतिरूक्षे भयं ब्रूयात् स्थालीपिठरसन्निभे ।
संक्षोभात् क्षीयते लोको दुर्भिक्षं वज्रसन्निभे ॥

वराहसंहितायाम् ।

क्षुन्मारकृद्घटनिभः खण्डो नृपहा विदीधितिर्भयद
तोरणरूपः पुरहा छत्रनिभो देशनाशाय ॥
ध्वजचापनिभे युद्धानि भास्करे वेपनेऽतिरूक्षे च ।

पराशरस्तु ।

तोरणसंस्थानः पुरनाशाय । छत्राकारो देशविपर्यय टाकारे च । शरासनाकृति*र्वज्राभो वा सद्य आहवाय । परुषो शस्यनाशनः ।

भीष्मपर्वणि कुरुक्षयनिमित्तम् ।

"द्विधाभूत इवादित्य उदये प्रत्यदृश्यत†" ।

वृद्धगर्गः ।

आदित्यमण्डलं छिन्नं द्विधा वा यदि वा त्रिधा ।
तद्राजमरणं ध्रुवाद्दण्डो वा यदि दृश्यते ॥

पराशरः ।

विलग्नाकृतिर्गर्भविनाशनाय । ऊर्ध्वदण्डो जटिल पठ्याधिकरः । संक्षिप्तः क्षयाय । वज्राकारो दुर्भिक्षयाय । रुधिरप्रभोऽनेकनृपतिसहस्राच्छादनकरः ।

भीष्मपर्वणि कुरुक्षयनिमित्तम् ।

"ज्वलन्त्या शिखया भूयो भानुमानुदितो रवि

---

* ध्वजाभो इति ख. । † १७ अध्याये ३ श्लो. ।
‡ १७ अध्याये ३ श्लो. ।

मयूरचित्रे ।

विषाणैरिव चादित्यस्त्रिकूट इव लक्ष्यते ।
जनमारान्निशस्त्राद्यं घोरमुत्पद्यते भयम् ॥

विष्णुधर्मोत्तरे ।

द्विसूर्ये गगने युद्धं क्षत्रियाणां विनिर्दिशेत् ।
द्विचन्द्रे ब्राह्मणाधिक्यमाधिक्यं प्रलयाय च ॥

राहसंहितायाम् ।

भाति यदा तुहिनांशुयुगं द्विजवृद्धिरतीव तदाऽऽशु शुभम् ।
न्तरवर्णरणोऽर्कयुगे जगतः प्रलयस्त्रिचतुष्प्रभृति ॥

नेयपुराणे रावणशक्रयुद्धे शक्रपराजयनिमित्तम् ।

सप्त चैवोत्थिताः सूर्याः शोषयन्तो रसातलम् ।

त्स्यपद्मपुराणयोर्हिरण्यकशिपुवधनिमित्तम् ।

सप्तधूमनिभा घोराः सूर्या दिवि समुत्थिताः ।
ः ।

दृष्टाः सूर्यास्तु चत्वार उदिताः सर्वतो दिशम् ।
शस्त्रेण जनमारेण तद्युगान्तस्य लक्षणम् ॥

ऽप्येतदुक्तम् ।
स्तु ।

ष्ट्वा त्रिचतुरः सूर्यानुदितान् सर्वतो दिशम् ।
स्त्रेण निधनं तत्र तद्युगान्तस्य लक्षणम् ॥

स्तान्द्भुतफलम् । तत्राहिमकिरण इत्यनुवृत्तौ वराहसंहितायाम् ।

क्तोऽस्तमेति रक्तोदितश्च नृपतिं करोत्यन्यम् ।
त एव रक्तोऽन्यं नृपं करोति । अन्यं परं शत्रुमिति यावत् ।
; ।

उच्चैरुदयते रूक्षो विरश्मिस्तु प्रकाशते ।
उच्चैरस्तमयं कुर्यान्महाभयकरः स्मृतः ॥

तिरेकेणोच्चैरुदयास्तसमयोः फलमेतत् ।



वराहसंहितायाम् ।

भानोरुदयेऽपि दिवाऽस्तमये गन्धर्वपुरप्रतिमाध्वजिनी ।
विम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत् ।

भार्गवीये ।

आदित्यस्य रथः श्वेतः सन्ध्यायां यदि दृश्यते ।
प्रत्यासन्नं भयं विद्यात् तस्मिन्नुत्पातदर्शने ॥

गर्गः ।

आदित्ये सरथा सेना सन्ध्याकाले यदा भवेत् ।
प्रत्यासन्नं विजानीयाद्भूमिपस्य पराजयम् ॥

पराशरः ।

अर्कमण्डले रथसेनातपत्रादिदर्शनं नृपनाशाय ।

सन्ध्याव्यतिरेकेणाप्येतत् फलम् ।

गर्गः ।

आदित्यस्य रथं दृष्ट्वा भ्रमन्तं वामदक्षिणे ।
देशस्य विप्लवं ब्रूयात् तस्मिन्नुत्पातदर्शने ॥

इत्येवं सन्ध्याव्यतिरेकेणापि ।

अत्रानुक्तविशेषशान्तिः ।

आदित्योत्पातेषु प्रभूतकनकान्नगोमहीदानादिका शान्तिरौत्पातिकफलगुरुलाघवमवगम्य कर्त्तव्या । आ च विशेषेणादित्यः पूजनीयः ।

एवदुक्तमाथर्वणाद्भुते ।

सूर्यस्योदयकाले तु विकृतिर्यत्र दृश्यते ।
मण्डले तत्समीपे वा रश्मीनां वा विपर्ययः ॥
विकारस्तु यदा तेषां सूर्यः पूज्योऽत्र देवताः ।

इत्यविहितविशेषशान्तय आदित्योत्पाताः ।

अथ विहितविशेषशान्तय आदित्योत्पाता मयूरचित्रे ।

शशशोणितवर्णेऽर्के युद्धं रुधिरकर्दमम् ।

गर्गस्तु ।

शशशोणितवर्णाभो यदा भवति भास्करः ।
तदा भवन्ति संग्रामा घोरा रुधिरकर्दमाः ॥

मध्याह्ने शशशोणितवर्णे सूर्ये बहवो घोराः संग्रामाः । अन्यदा त्वेक एवेति वचनमञ्जस्यम् ।

तथा च वराहसंहितायाम् ।

शशरुधिरनिभे भानौ नभःस्थलस्थे भवन्ति संग्रामाः ।
शशिसदृशे नृपतिवधः क्षिप्रं चान्यो नृपो भवति ॥

नभःस्थलस्थे दशमस्थे मध्याह्न इत्यर्थः । शशिसदृशश्च मध्याह्न एव ।
तथाऽऽह वृद्धगर्गः ।

कांस्यपात्रीनिभः सूर्यः शशाङ्क इव लक्ष्यते ।
विरश्मिर्नभसो मध्ये महद्भयकरः स्मृतः ॥

महो देशस्य च नाशो महद्भयम् ।
तथा च मयूरचित्रे ।

आदर्श इव दृष्टश्च राज्ञो देशस्य चान्तकृत् ।

आदर्श इव सूर्ये च जनदेशभयं वदेत् ।

यास्तमये भानौ कबन्धसदृशे भयम् ।
च पराशरः ।
कृतिर्महासंग्रामकृत् ।
तु तारकवधनिमित्तम् ।
ते च कबन्धाभो भास्करोऽपि तदा भृशम् ।
।
न्धसदृशे सूर्ये शस्त्रपातभयानि च ।
नापतेर्वधश्चैव भयं तद्देशभूपतेः ॥
रीताश्च धर्मिष्ठा जायन्ते निर्धनाः प्रजाः ।

गोब्राह्मणहितं कुर्यात् पुण्यं भूतसुखावहम् ।
त्रिरात्रोपोषितो भूत्वा हविष्याशो पुरोहितः ॥
अपामार्गस्य जुहुयात् समिधोऽष्टोत्तरं शतम् ।
अच्छिन्नदर्विकां कृत्वा ब्राह्मणान् भोजयेत् तदा ॥
पायसं कृशरं चैव यथाकाममतन्द्रितः ।
सुवर्णं रजतं कांस्यं दद्याद्धूरि च दक्षिणाम् ॥

इति प्रथमशान्तिः ।

मयूरचित्रे ।

शङ्खगोक्षीरवर्णे च सूर्ये युद्धं सुदुष्करम् ।
कृष्णा रेखा रवेर्मध्ये भयाय मरणाय च ॥

'कृष्णरेखो रविर्देशविभ्रमराजमृत्युसूचकः'–इति वृद्धगर्गेणोक्तम् । तद्ग्रन्थेव लिखितमिति ।

वराहसंहितायां तु ।

कृष्णा रेखा सवितरि यदि हन्ति ततो नृपं सचि

अल्पत्वेन नृपं सचिवमिति पाठो दर्शितः । नृपं हन्ति सचिवं च तद्व्याख्यम् ।

मयूरचित्रे ।

युवराजवधश्छिद्रे वधो माण्डलिकस्य च ।
रविबिम्बस्थबुधाच्छादमकृतच्छिद्रस्य युवराजः
बुधस्य कुमारत्वात् ।
अधःस्थभार्गवकृतरविच्छिद्रस्य मण्डलेश्वरस
म् । भार्गवस्य सचिवत्वात् ।

शङ्खगोक्षीरवर्णादिषु शान्तिर्मयूरचित्रे ।

रवेः पूजोत्सवं कृत्वा जुहुयात् समिधां तत·
अर्कस्याथ घृताक्तानामाकृष्णेनेति मन्त्रतः ॥
द्वादशैव सहस्राणि त्वष्टाभिरधिकानि च ।

पायसं मधुसंयुक्तं दध्योदनगुडोदने ॥
द्वादशाष्टौ द्विजान् पङ्क्त्वा भोजयेद्दक्षिणां तथा ।
सुवर्णं रजतं ताम्रं वस्त्रं धान्यं च गोस्तिलान् ॥

इति द्वितीयशान्तिः ।

कठश्रुतिः ।

यत्रादित्ये छिद्रं दृश्यते तत्र नरपतेर्वधमादिशेत् ।

शौनकेऽपि प्रमाणान्तरेणैतदुक्तम् ।

नूपुरचित्रे तु ।

दृष्ट्वा तु भास्करे छिद्रं भूपालस्य वधं वदेत् ।
परचक्रागमं चैव यथा गर्गेण भाषितम् ॥

[illegible]गर्गवाक्यं विना रविच्छिद्रे परचक्रागमः । नृपजन्मनक्षत्रस्थरविच्छिद्रे
[illegible]तः ।

था च वराहसंहितायाम् ।

यस्यर्क्षे* ऽर्कच्छिद्रस्तस्य विनाशो महीशः* ।

[illegible]कणिकायाम् ।

[illegible] छिद्रो यस्यर्क्षेऽर्कस्तन्नक्षत्रो नृपो नश्येत् ।

[illegible]र्मोत्तरे तु ।

[illegible]नक्षत्रगते सूर्ये छिद्रं वै संप्रदृश्यते ।
[illegible]ज्ञातः पार्थिवः क्षिप्रं परलोकं गमिष्यति ॥

[illegible]तु यत्र तत्र नक्षत्रस्थेऽपि रवौ नृपवधः ।

[illegible]राहसंहितायाम् ।

[illegible]पत्रयो बहुच्छिद्र-इति ।

[illegible]

[illegible]च्छिद्रो द्विधा वा दृश्यमानो राज्ञो मृत्युं देशविनाशं

[illegible]न्द्रं

* [illegible]र इति ग. ।



अस्यार्थः । सर्वतश्छिद्रो राजमृत्युमाचष्टे । द्विधा दृश्यमानो देशविनाशं चकार राजमृत्युं च ।

एकस्मिन्नपि सन्ध्याकालिकपाण्डुरच्छिद्रे विशेषमाह गार्ग्यः ।

आदित्ये पाण्डुरश्छिद्रः सन्ध्यायां यदि दृश्यते ।
सराष्ट्रः सपुरो राजा क्षिप्रमेव विनश्यति ॥

भार्गवीये प्रमाणान्तरेणैतदुक्तं रविच्छिद्रे पष्टिशान्तिः ।

मयूरचित्रे तु ।

तिलैर्दूर्वाभिराम्रस्य पत्रैश्चैव यवैस्तथा ।
*धान्यैरौदुम्बरीभिश्च श्रीफलैराहुतिक्रिया ॥
समाप्ते भोजनं कृत्वा नटप्रेक्षणमादिशेत् ।
वेशदण्डाँ?स्ततो दद्याद्धारणान् स्यात् ततः शुभम् ॥

अपर्वग्रहरविच्छिद्रे दिवोल्कापातेषु मयूरचित्रे तृतीया शान्तिर्विहिता । सा पर्वग्रहणे लिखितव्या ।

कठश्रुतौ च रविच्छिद्रे सूर्यदेवतादिशान्तिर्विहिता सा च कठश्रुतिरहितास्तुतेषु लिखितव्येति ।

मयूरचित्रे तु ।

रक्तोत्पलनिभे भानौ नभःस्थे भूपतेर्वधः ।

एतदपि मध्याह्न एव ।

पराशरः ।

अर्धं प्रजानाशाय ।

मयूरचित्रे तु ।

दृश्यते भास्करस्यार्धं गृहीतमिव चापरम् ।
कम्पते यदि वाऽप्येव तदा विद्याज्जनक्षयम्
उदयास्तमये भानौ चक्रवद्भ्रमणे सति ।
परचक्रागमो व्याधिर्देशस्य च परिक्षयः ॥
अनयोर्वर्णसाङ्कर्यमित्यादिर्विप्लवो भवेत् ।

* सुधान्यौदुम्बरीभिश्च इति ख, ।

प्रथमां वा द्वितीयां वा तेषु शान्तिं प्रयोजयेत् ॥

ापूरचित्रे ।

व्योममध्यगतं पश्येद्यदि सूर्यद्वयं नरः ।
चौरव्याघ्रभयावृष्टिर्दुर्भिक्षं राष्ट्रविद्रवः ॥
दधिमधुघृताक्तानां जुयादयुतं शुचिः ।
उपोष्यार्कस्य समिधां धेनुं दद्याद्द्विजातये ॥

ति सप्तमीशान्तिः ।

रदः ।

आकाशस्थो यदा भानुरुदित्वा न प्रकाशते ।
व्याघ्रचौरभयं चैव दुर्भिक्षं राष्ट्रविद्रवः ॥

तदपि मध्याह्न एव न प्रकाशते तथाविधप्रकाशयुक्तो न भवति ।

इमा रुद्रायेति मन्त्रैर्जुहुयात् सर्पिषा हुतिम् ।
आहुतेर्हे सहस्रे तु होमश्च कथितो भवेत् ॥
*वृषभं दक्षिणां दद्यात् ततः संपद्यते शुभम् ।

विहितविशेषशान्तय आदित्योत्पाताः । अत्रानुक्तानामुत्पाकसमयानां सूर्याद्भु- ।
फलपाको बोद्धव्यः ।

गार्गेये ।

द्विपाकः सूर्यस्य इति ।

त श्रीमहाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचिते-
अद्भुतसागरे सूर्याद्भुतावर्त्तः ।

अथ चन्द्राद्भुतावर्त्तः ।

सूचकचन्द्रलक्षणमाह पराशरः ।

माः स्निग्धप्रसन्नो रश्मिवान् श्वेतः क्षेमसुभिक्षवृष्टिकरः ।

ाम् इति ख, ।

तथा वराहसंहितायाम् ।

यदि कुमुदमृडालहारगौरस्तिथिनियमात् क्षयमेति वर्धते च
अविकृतगतिमण्डलांशुयोगो भवति नृणां विजयाय शीतरश्मिः
स्निग्धः स्थूलः समशृङ्गो विशालस्तुङ्गश्चोदग्विचरन् नागवीथ्यां
दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः ॥

अत्रैव समागमे नागवीथीं वक्ष्यामः । येषामयं स्वामी तेषामेवम्भूतो विशेषेण दयाय । विपरीतो विशेषेण विपरीताय ।

चन्द्रस्वामिकान्याह यवनेश्वरः ।

स्त्रीचित्तनिद्रारतिभक्ष्यपेयःशीतद्रवस्वादुरसौषधीनाम् ।
स्रग्वस्त्रभूषामणिमौक्तिकानां प्रभुः शशाङ्को लवणाम्बुजानां

अपश्च ।

पर्वता जलदुर्गाश्च कोशलाः पुङ्गणा हलाः ।
स्त्रीराज्यं *तरुकर्कांद्यास्तुषारा वनवासिनः ॥
मौक्तिका मणिशङ्खाब्जमौषधीः कुसुमं फलम् ।
द्वीपा महार्णवीयाश्च मधुरा लवणादयः ॥
गोधूमाः शालयः शृङ्गिकर्षकाश्च यवा अपि ।
सोमपत्राह्मणानां च याज्ञिकास्तुरगा रसः ॥
स्त्रीसौभाग्यविविक्तानि हास्यलास्येक्षितानि च
एतेषामधिपश्चन्द्रो हृष्टानां च प्रकीर्त्तितः ॥

वराहसंहितायाम् ।

गिरिसलिलदुर्गकोशलभरुकच्छसमुद्ररोमकतुषाराः
वनवासितङ्गणहलस्त्रीराज्यमहार्णवद्वीपाः ॥
मधुररसकुसुमफललवणसलिलमणिशङ्खमौक्तिकाद

* भरुकच्छश्च इति अ. । † कच्छाया इति प. ।

शालियवौषधिगोधूमसोमपाक्रन्दविप्राणाम् ॥
सतशुभगतुरगरतिकरयुवतिचमूनाथभोज्य*विप्राणाम् ।
ङ्गिनिशाचरकार्षकयज्ञविदां चाधिपश्चन्द्रः ॥

अथाशुभसूचकचन्द्रलक्षणम् ।

पराशरः ।

खण्डः स्फटितो विवर्णो वेपनोऽशशाङ्कश्चन्द्रमाः प्रजानाशाय राज्यंशप्लुवाय च-इति ।

आशाङ्क इति लक्ष्मरहितः ।

भीष्मपर्वणि कुरुपाण्डवक्षयनिमित्तम् ।

"अलक्ष्य :प्रभया हीनः पौर्णमासीं च कार्त्तिकीम् ।
चन्द्रोऽभूदग्निवर्णश्च पद्मवर्णे नभस्तले"† ॥

वराहसंहितायाम् ।

भस्मनिभः परुषोऽरुणमूर्त्तिः शीतकरः किरणैः परिहीनः ।
इयवतनुः स्फुटितः स्फुरणो वा क्षुद्भमरामयचौरभयाय ॥

उपप्लवः ।

वलन्नमध्यो नीलाभो वज्रसंस्थानसंस्थितः ।
मध्यच्छिद्रो विलीनाभो भयं कारयते महत् ॥

फलं भार्गवीये ।

शुक्ले शरीरे सोमस्य ब्रह्मवृद्धिं विनिर्दिशेत् ।

शुक्लः स्निग्धः प्रसन्नश्च क्षेमवर्षकरः शशी ।

स्तु ।

धिशङ्कसवर्णस्तु शुक्लाराशिनिभोऽमलः ।
राजिगुरतिसुस्निग्धः क्षेमारोग्यकरः शशी ॥

*गम् इति अ. । † २ अः २३ श्लो. ।

गर्गः ।

पाण्डुवर्णैः शशी मध्ये सुभिक्षक्षेमकारकः ।

गार्गीयेऽपि ।

सुवर्णाभो वस्त्रवृद्धिः ।

हरिवंशे हिरण्यकशिपुवधनिमित्तम् ।

"विवर्णत्वं च भगवान् गतो निशि निशाकरः"*

पराशरः ।

भस्मारुणवहिताम्रपीतपाण्डुनीलरूक्षवर्णैः क्षुद्भैरकरः ।

वृद्धगर्गसंहितागार्गीयभार्गवीयेषु ।

मञ्जिष्ठारुणवर्णो वा ज्वरं तीव्रं निवेदयेत् ।

वृद्धगर्गसंहितायां गार्गीये च ।

लोहिते कुप्यते शस्त्रं दुर्भिक्षं चोपजायते ।
कपिले कुप्यति त्वग्निरक्षिरोगश्च जायते ॥
कृष्णवर्णो गवां हर्त्ता दुर्भिक्षस्य च कारकः ।
नानाविधैर्व्याधिभिश्च तदा संपीड्यते प्रजा ॥
हरितः सर्वशस्यानामुपद्रवकरः स्मृतः ।

वृद्धगर्गः ।

हरितोऽपीतये विद्यात् पशूनां चाप्युपद्रवम् ।
पीतवर्णो गजान् हन्ति पीतो व्याधिकरस्तथा ॥

तत्रैव ।

कृष्णे शरीरे सोमस्य शूद्राणां वधमादिशेत् ।
पीत शरीरे सोमस्य वैश्यानां वधमादिशेत् ॥
रक्ते शरीरे सोमस्य राज्ञां च वधमादिशेत् ।

राज्ञां क्षत्रियाणाम् ।

---

* ४६ अ. १ श्लो. । तत्र 'गतो दिवि दिवाकरः' इत्युपलभ्यते ।

वृद्धगर्गः ।

नीले श्यामे च शशिनि रूक्षे धूमतमोवृते ।
अनावृष्टिभयं रोगानग्निवातं विनिर्दिशेत् ॥
पिण्डितस्तस्करार्कर्षी *रसोऽन्नार्घकरो भवेत् ।

पिण्डितो घनः ।

प्रथोन्नतनीचस्थानोदितचन्द्रफलम् । तत्र वृद्धगर्गः ।

उच्चैः सुभिक्षं नीचैस्तु सोमे दुर्भिक्षलक्षणम् ।

अथ प्रथमोदितचन्द्रस्य नीलमेघाद्यावरणफलम् । तत्र वृद्धगर्गः ।

यदा सोमः प्रतिपदि नीलैराच्छाद्यते घनैः ।
अन्यर्त्तुकाले यात्रायां मरणं तत्र निर्दिशेत् ॥

अन्यर्त्तुकाल इति प्रावृट्कालादन्यत्रेति ।

वा ।

यदा सोमः प्रतिपदि रजसा तमसाऽथ वा ।
आवृतः प्रतिदृश्येत भयं तत्र समादिशेत् ॥

प्रतिपद्ग्रहणं प्रथमदर्शनोपलक्षणम् ।

चन्द्रकुक्षादिशरीरलक्षणम् ।

गतागतप्रमाणादधिकन्यूनप्रमाणफलम् । वराहसंहितायाम् ।

यो विशालमूर्त्तिर्नरपतिलक्ष्मीविवृद्धये चन्द्रः ।

विशालः श्रीकरो भूमेः राज्ञश्चैव जयावहः ।
सुवृष्टिः सुषमा चैव ब्रह्मवृद्धिस्तथोत्तरा ॥

प्रस्तारायामाभ्यां बृहत्प्रमाणः ।

हितायाम् ।

स्थूलः सुभिक्षकारी प्रियधान्यकरस्तु तनुमूर्त्तिः ।
स्वल्पो दुर्भिक्षकरो महान् सुभिक्षावहः प्रोक्तः ॥

त्यकर इति महार्घकर ।

नाशकरः इति घ. ।

अथ संस्थानि तत्र नौसंस्थानमाह वृद्धगर्गः ।

ईषन्मात्रोद्यतं शृङ्गं विशालः कुक्षिमान् स च ।
शशी तत् खलु नौस्थानं क्षेमसौभिक्षकारकम् ॥

उभयमेव शृङ्गं यदा किञ्चिदुन्नतं भवति तदा नौस्थानं भवति ।
तथा च पराशरः ।

नाभ्युच्छ्रितोभयं शृङ्गं कुक्षिमान् विशालो नौस्थान

गार्गीये ।

नातिमात्रोन्नतः पीनो विशालः शुभमण्डलः ।
शुक्लः स्निग्धो यदा चन्द्रो नौस्थानं तदिहोच्यते ॥
तत्र सर्वस्य लोकस्य सुखं स्यादुत्तरोत्तरम् ।
नाविकानां भवेत् पीडा नौस्थाने शशिनि स्थिते ।

शुभमण्डलः शोभनं छायामण्डलं यस्येति ।

भार्गवीये ।

स्निग्धः पीनः सुवर्णाभः पक्षादौ यदि चन्द्रमाः ।
नौस्थायी संप्रदृश्येत *वसुवृद्धिं विनिर्दिशेत् ॥

अथ लाङ्गलम् । तत्र पराशरः ।

ईषदुन्नतोत्तरशृङ्गो लाङ्गलसंस्थानम् । तत् सुभिकम् ।

गार्गीये तु ।

†नीचं स्याद्दक्षिणं शृङ्गं चन्द्रस्योन्नतमुत्तरम् ।
तत् स्थानं लाङ्गलं नाम क्षेमारोग्यसुभिक्षकृत्
राज्ञां प्रीतिर्निर्निमित्तं पीडा लाङ्गलजीविनाम्

उन्नतमित्यर्धोन्नतम् ।

तथा वराहसंहितायाम् ।

अर्धोन्नते च लाङ्गलमिति पीडा तदुपजीविनां

---

* वसुवृद्धिम् इति ख. । † नतम् इति ग. ।

प्रीतिश्च निर्निमित्तं मनुजपतीनां सुभिक्षं च ॥

[illegible]गर्गस्तु ।

उत्तरं शृङ्गमुद्यम्य नीचं यद्यस्य दक्षिणम् ।
कुरुते लाङ्गलस्थानं चन्द्रमाः शुभदर्शनम् ॥
तस्मिन् क्षेमं सुभिक्षं च स्थाने भवति लाङ्गले ।
अनामयं प्रजानां च राज्ञां च विजयो भवेत् ॥
पूर्वाणामुत्तराणां च विनिर्देश्यस्तदा जयः ।
*बहुक्षत्रविवृद्धिं च दिशं हन्याच्च दक्षिणाम् ॥

[illegible]र्गवीये ।

[illegible]प्याभो लाङ्गलस्थायी श्रीमान् संलक्ष्य मण्डलः ।
पक्षादौ यदि दृश्येत ब्रह्मक्षत्रसुखावहः ॥

[illegible]गर्गस्तु ।

रूप्याभो लाङ्गलस्थायी ब्रह्मक्षत्रसुखावहः ।
कुङ्कुमाभो मरणदो हरिद्राभस्तथैव च ॥

[illegible]ली ग्रसते लोकान् युगान्तं प्रतिपादयेत् ।

[illegible]दीक्षायं तद्दुष्टलाङ्गलपरम् ।

[illegible]॥ सोमः प्रतिपदि नौस्थायी संप्रदृश्यते ।
[illegible]रोलक्षशृङ्गो वा लाङ्गली वा मनोहरः ॥
[illegible]सुभिक्षमारोग्यं सर्वभूतेषु निर्दिशेत् ।
[illegible]विजयं ब्रूयाद्धर्धन्ते शृङ्गिणस्तथा ॥

[illegible]संहितायाम् ।

[illegible]लरूपः क्षेमसुभिक्षावहो भवति ।

*[illegible]सम्मतः पाठः ।

25007

मृदङ्गरूपो मध्ये मृदङ्गवत् स्थूलः ।
यथा । चन्द्रशुभलक्षणे गर्गः ।

मृदङ्गमध्यः सोमो वा सौम्यायां चेन्नतो दिशि ।

अथाशुभसंस्थानानि तत्र दुष्टलाङ्गलमाह गार्ग्यः ।

दक्षिणं चोन्नतं शृङ्गं न्यूनं तस्य तथोत्तरम् ।
दुष्टलाङ्गलसंस्थानं प्रजाक्षयकरं स्मृतम् ॥

उन्नतमिति अर्धोन्नतमित्यर्थः ।
तथा च पराशरः ।

अर्धोन्नतदक्षिणोन्नतशृङ्गो दुष्टलाङ्गलः पुरसैन्योद्योः कृत्-इति ।

पुरसैन्ययोरुद्योगनाशः ।
तथा च वराहसंहितायाम् ।

दक्षिणविषाणमर्धोन्नतं यदा दुष्टलाङ्गलाख्यं तत्
*पाण्डानरेश्वरनिधनकृदुद्योगकरं बलानां च ॥

गार्गीये ।

नीचमुत्तरशृङ्गं स्याद्दक्षिणं चोन्नतं यदि ।
सैन्योद्वेगकरं स्थानं तदिन्दोर्दुष्टलाङ्गलम् ॥
पाण्डयस्य नृपतेर्मृत्युं कुर्याच्चन्द्रस्तथोदितः

वृद्धगर्गः ।

दक्षिणं शृङ्गमुद्यम्य नीचमस्य तथोत्तरम् ।
सेनोद्योगकरं स्थानं कुरुते दुष्टलाङ्गलम् ॥
दक्षिणाः पश्चिमाश्चैव विजयन्ते तथास्थिते
वैश्यशूद्राभिवृद्धिश्च शस्त्रमृत्युश्च जायते ॥
बाह्लीकयवनायोध्यांस्तुषाराँश्च समालवान् ।
शूरसेनाँश्च निर्हन्ति चन्द्रश्चैव तथोत्थितः

* पाण्ड्यो देशविशेषः । तद्देशभवनरेश इति ।

अथ धनुर्गार्गीये ।

धनूरूपे चन्द्रमसि युद्धं सर्वत्र जायते ।
ज्यायतस्तु जयस्तेषां पृष्ठतस्तु पराजयः ॥

ज्यौतिषपराशरवराहसंहिताद्ययेऽपि चैवम् ।

र्गवृद्धगर्गौ ।

उदये च यदा सोमो दृश्यो धनुरिवोदितः ।
धनुर्धराणामुद्योगो जगतश्च पराभवः ॥
क्षत्रिया क्षत्रियान् हन्ति वर्णाश्चैव तथाऽपरे ।
ज्यायतश्च जयस्तेषा पृष्ठतश्च पराजयः ॥

र्गवीये तु ।

लाक्षारुधिरवर्णाभो धनुःस्थायी यदा भवेत् ।
संग्रामं योजयेत् सोमो लोके च तुमुलं भयम् ॥

हसंहितायाम् ।

धनुःस्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो
बलोद्योगं चन्द्रः कथयति जयं ज्याऽस्य च यतः ।

ङ्गम् । तत्र गर्गः ।

सोमुखं यदा शृङ्गं शशिनो दृश्यते तदा ।
स्थानवर्जितकरे गोघ्नं दुर्भिक्षदायकम् ॥

कवचनिर्देशादेकं शृङ्गम् ।

वराहसंहितायाम् ।

भ्युच्छ्रायादेकं शशिनो यद्यवाङ्मुखं भवेच्छृङ्गम् ।
वर्जितमित्यसुभिक्षकारि तद्गोधनस्यापि ॥

तु ।

ङ्गभयदोऽवाक्शिराः । एतत्संस्थानश्चन्द्र उत्तरशृङ्गोन्न-
लं करोति ।

25007

तथा च वराहसंहितायाम् ।

प्रोक्तस्थानाभावादुदगुच्चः *शस्यवृद्धिवृष्टिकरः-इति ।

अन्यथा प्रोक्तस्थानाभावादित्यनर्थकं स्यात् ।

गार्गीये त्ववाक्शिरोलक्षणमन्यथा तद्यथा ।

दक्षिणेन स्थूलकायो हीनकायस्तथोत्तरे ।
अवाक्शिरसि चन्द्रेऽस्मिन्नचिरान्नक्षतिः क्षितिः ॥

भीष्मपर्वणि कुरुपाण्डवसेनाक्षयनिमित्तम् ।

अवाक्शिराश्च भगवानुदतिष्ठत चन्द्रमाः ।

अथ संकटं गार्गीये ।

तीक्ष्णसंकटशृङ्गाग्रो रोगशस्त्रक्षुधावहः ।

वृद्धगर्गस्तु ।

संगताभ्यां समाभ्यां च तीक्ष्णाभ्यां यदा शशी
दृश्यते संकटस्थानं रोगशस्त्रक्षुधाकरम् ॥

अथ कुण्डम् । तत्र गर्गः ।

अच्छिन्ना मण्डले रेखा शशिनो दृश्यते यदा ।
कुण्डाख्यं नाम तत् स्थानं नृपविग्रहदायकम् ॥

वराहसंहितायाम् ।

अभ्युच्छिन्ना रेखा समं ततो मण्डले च कुण्
तस्मिन् माण्डलिकानां स्थानत्यागो नरपतीन

अथ दण्डः । तत्र पराशरः ।

दंण्डवद्दण्डस्थायी दण्डकृत् प्रजानाम् ।

गर्गवृद्धगर्गौ तु ।

चन्द्ररेखा यदा चोर्ध्वा भवेद्दण्डवदायता ।
उदक्छृङ्गाधिका चैव दण्डस्थानं तदुच्यते ॥

वृद्धगर्गः ।

उद्युक्तदण्डा राजानो विनिघ्नन्ति समन्ततः

---

* शस्यवृद्धि-इति ब. ।

पौरं जनपदं चात्र ज्वरदाहश्च जायते ॥

र्गस्तु ।

उद्युक्तदण्डा राजानो विनिहन्युः समन्ततः ।
गवां पीडां विजानीयादण्डस्थायी यदा शशी ॥

र्गीवे तु ।

उदितो दण्डवच्चन्द्रो गवां पीडाकरः स्मृतः ।
उग्रदण्डाश्च राजानो विनिघ्नन्ति परस्परम् ॥

वज्रः । वराहसंहितायाम् ।

मध्यतनुर्वज्राख्यः क्षुद्भयकृत् संभ्रमाय राज्ञां च ।

र्गः ।

राज्ञां भयमसौ तीक्ष्णं विदध्याद्वज्रविग्रहः ।

युगम् । तत्र गर्गवृद्धगर्गौ ।

चन्द्ररेखा यदा व्यक्ता दक्षिणोत्तरमायता ।
शुक्लादौ प्रतिदृश्येत तद्युगस्थानलक्षणम् ॥

नोद्योगा भवन्त्यत्र भूमिकम्पश्च जायते ।

नंस्थानजगद्विद्रवभूकम्पाय ।

द्योगो भवत्यत्र दुर्भिक्षं भूमिकम्पनम् ।
विधैर्व्याधिभिश्च तदा संक्षीयते प्रजा ॥

पनम् । तत्र गर्गः ।

कोट्यायतः किञ्चिद्युगाकारो यदा शशी ।
शायीति स ज्ञेयः सार्थहा वृष्टिकारकः ॥

यतः किञ्चिदिति याम्यकोट्या किञ्चिदुन्नतः ।
संहितायाम् ।

व याम्यकोट्यां किञ्चित् तुङ्गं स पार्श्वगा.

विनिहन्ति सार्थवाहान् वृष्टेश्च विनिग्रहं कुर्यात् ॥

गार्गीये तु ।

किञ्चित् तुङ्गं याम्यकोट्यां युगमेव यदा भवेत् ।
अवृष्टिः पार्वतीयानां मरणं च तदा भवेत् ॥

भार्गवीये तु ।

पार्श्वशायी तु विप्राणां भवेद्विघ्नसमन्वितः ।

घटकणिकायाम् ।

दण्डावाङ्मुखसंकटजर्जरकूटीकृतिर्न शुभः ।

जर्जर इति क्वचिन्निविडः क्वचिद्घानिविडः । कूटीकृतिः फालाकृतिः ।

तत्रैव ।

उदयत्रयमपि सदृशं न शुभं बहुरूपताऽथ चैक

शुभमप्येकं स्थानं यदि निरन्तरमुदयत्रये भवति तदाऽप्यशुभम् । अशु
मेवाशुभम् । एकस्मिन्नेवोदयेऽनेकरूपताऽप्यशुभा ।

वराहसंहितायाम् ।

प्रोक्तस्थानाभावादुदगुच्चः क्षेमवृद्धिवृष्टिकरः ।
दक्षिणतुङ्गश्चन्द्रो दुर्भिक्षभयाय निर्दिष्टः ॥

उत्तरायणस्थयो रविचन्द्रमसोः संयोगानन्तरमुदितस्य चन्द्रमसे
अशुभा । रविचन्द्रस्योत्तरावर्जितत्वेन तस्या एव प्रकृतत्वात्
भफला प्रकृतिविपरीतत्वात् । अथा चोत्तरशृङ्गोन्नताद्युत्तरायणे
दक्षिणशृङ्गोन्नतावशुभफलमुक्तं भार्गवीये ।

प्रथमे दर्शने त्विन्दोः समासाद्य यदा ग्रह
उत्तरं वर्धते शृङ्गं नीचीभवति दक्षिणम् ।
एवमेव श्रविष्ठाद्ये आश्लेषाद्ये च चन्द्रमाः
उन्नच्छेद्दक्षिणं शृङ्गं नीचीभवति चोत्तरम्
अत्र नश्येत राष्ट्रं च अन्तर्गिरि महागिरि
विदर्भान् मद्रकाँश्चैव कौशिकान् द्राविडाँ
अन्ध्राँश्चैव शकाँश्चैव भारताँश्चापि सर्वश

सागराँस्तिरजाँश्चैव समुद्रे ये तु दक्षिणे ॥
एताञ्जनपदान् हन्ति यदि स्यादुत्तरोन्नतः ।
काश्मीरान् दरदान् दर्भान् शूरसेनान् पटच्चरान् ॥
शाल्वाँश्च विरजाँश्चैव समुद्रे ये च पश्चिमे ।
एताञ्जनपदान् हन्ति यदा स्याद्दक्षिणोन्नतः ॥

राद्य यदा ग्रहमिति भूम्यावरणानन्तरितप्रथमदर्शनव्याकृत्यर्थम् ।
ोदयसमये त्वयनरेखात: समोत्तरवर्त्तिनो: समदक्षिणवर्त्तिनोर्वा भिन्नायन-
चन्द्रार्कयो: समदृङ्नता भवति तत्फलम् ।

कायाम् ।

समः—इति ।
समानि सुभिक्षादीनि तस्मिन् मासे करोतीति समः ।
गः ।

शृङ्गो यथा दृश्यः शशी क्षेमसुभिक्षदः ।
पत्सदृशं तत्र वासवो वर्षते तद
भयत्र सम्बध्यते । प्रतिपत्सदृश
ति ।

हसंहितायाम् ।
शशिनि सुभिक्षक्षेमवृष्टयः प्रथमदिवस
स्तु रविचन्द्रयोः समदृङ्नक्षत्रोदये विकृतिस
ाशः ।
भि... रश्मिस्थान इन्द्रधनुर्भयकृत् ।

तकच्छन्नसंस्थानं एकशृङ्गं रवशृङ्गके ।
वुभिक्षशस्त्राणि प्राणिनां च पराभवः ॥

ानि शुक्लप्रतिपदि द्वितीयायां वा लक्षणानि भवन्ति
संस्थानानि ।

ननु रवेर्द्वादशभिः क्षेत्रांशैरन्तरिते चन्द्रमसि शुक्लप्रतिपत्तिथिपूर्णता । च चन्द्रकालांशारन्तरिते चन्द्रमसि तदुदयः क्षेत्रांशकालांशानां वा दूरान्तरं शुक्लप्रतिपदि चन्द्रदर्शनम् ।

अत्रोच्यते । बृहदुदयमानराशिस्थस्य बृहत्फलदृक्कर्मद्वयसंस्कृतस्य चन्द्रशुक्लप्रतिपदः किञ्चिदधिकार्धोपरि दर्शनसम्भावनेत्यतो युक्तं प्रतिपदि चन्द्रदर्शनं स्वल्पोदयमानराशिस्थस्य बृहदूनफलदृक्कर्मद्वयसंस्कृतस्य चन्द्रमसः शुक्लद्वितीयादूनार्धपर्यन्तमदर्शनसम्भावनेत्यत उक्तसामन्यां शुक्लप्रतिपदि चन्द्रमसो दर्शनद्वितीयायामप्यदर्शने च नोत्पातबुद्धिः कर्त्तव्येति । अत्र यानि यानि संस्कृङ्गोन्नतिवासनया न सम्भवन्ति तानि तान्येव दोषकराणि भवन्ति ।

अथ शृङ्गोन्नतिवासना सूर्यसिद्धान्ते ।

तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः ।
प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः

वराहसंहितायाम् ।

सलिलमये शशिनि रवेर्दीधितयो मूर्छितास्तमे
क्षपा[illegible]र्पणोदरनिहिता इव मन्दिरस्यान्त

[illegible]स्य नित्यं *कामय
[illegible]म्बस्य न हितार्थं कथञ्चन
इति अर्थविभ्यकान्तिं करोतीत्यर्थः ।

"दृष्टं सितमर्धं कृष्णमदृष्टं यथाऽऽत
कुम्भस्येवासन्नं रवेरधःस्थस्य चन्द्रस्य" §

वराहसंहितायाम् ।

नित्यमधःस्थस्येन्दोर्भाभिर्भानोः सितं भवत्यर्धं
स्वच्छायया ऽन्यदसितं कुम्भस्येवातपस्थस्य ॥

---

* भासयते इति अ. । + नाधुनिकसूर्यसिद्धान्तेऽस्यो
‡ कुम्भस्य तथाऽऽसन्नम् इति अ. । § शृङ्गोन्नत्यधिकारे २

सूर्यसिद्धान्ते ।

"विप्रकर्षं यदा याति ह्यधस्ताच्चन्द्रमा रवेः ।
तथा तथाऽस्य भूदृश्यमशं भासयते रविः"* ॥

वराहसंहितायाम् ।

त्यजतोऽर्कतलं शशिनः पश्चादवलम्बते यथा शौक्ल्यम् ।
दिनकरवशात् तथेन्दोः प्रकाशतेऽधःप्रभृत्युदयः ॥
प्रतिदिवसमेवमर्कात् स्थानविशेषेण शौक्ल्यपरिवृद्धिः ।
भवति शशिनोऽपराह्णे पश्चाद्भागे घटस्येव ॥

नन्वादित्याधःस्थयोर्जलबिम्बयोर्बुधशुक्रयोः कथं खण्डबिम्बत्वमवलोक्यते ।
उ . अधःस्थत्वेऽपि स्वल्पत्वाद्बुधशुक्रयोः सूर्यासन्नकक्षत्वाच्च सूर्यतले त्यक्ते
मन्तत योगतबिम्बार्धभागो रविरश्मिप्रतिभासितो भवति । अतो युक्तमनयोः
र्धबिम्बदिग्दर्शनमिति ।

अथ समागमः । हरिवंशे हिरण्यकशिपुवधनिमित्तम् ।

"अयोगतश्च चारांशुः सर्वेष्वृक्षेषु चन्द्रमाः" ।

मत्स्यपुराणपद्मपुराणयोश्च ।

"अन्योन्यनश्चाप्यचरद्योगं निशि निशाकरः ।
. सह नक्षत्रैस्तारापतिररिन्दमः"* ॥

राहसंहितायाम् ।

ागतानि पौष्णाद्दशार्द्रादश रौद्राच्च मध्ययोगीनि ।
ादीनि नवर्क्षाण्युडुपतिनाऽतीत्य युज्यन्ते ॥

रे ।

द्रमा नक्षत्राच्छादी न शस्यते ।

च्छादीति योगताराच्छादनपरम् ।

---

*सूर्यसिद्धान्तेऽस्योपलब्धिः ।

श्लो. तत्र "तारासु सर्वेष्वृक्षेषु संस्थिताः" इत्युपलभ्यते ।

णे १६३ अ. ३५ श्लो. । तत्र "अन्यं गते चाप्यचरन्मार्गं निशि नि-
भ्यते ।

योगतारालक्षणं तु ।

स्वतारागणमध्ये तु श्वेता वा दीप्तमत्तरा ।
योगतारेति सा प्रोक्ता नक्षत्राणां पुरातनैः ॥

वृद्धगर्गः ।

रमते यस्य नक्षत्रे सोमो यस्य च शोभनः ।
वृद्धिं तस्योत्तमां विद्याद्विपरीते विपर्ययम् ॥

रमत इति सन्निहितो भवतीत्यर्थः । यस्येति पुरुषस्य देशस्य द्रव्यादेश्च ।

विष्णुधर्मोत्तरे ।

चन्द्रमा जन्मनक्षत्रं परित्यजति यस्य च ।
श्यावो रूक्षोऽपसव्यश्च तस्य विद्युपद्रवम् ॥

भार्गवीये ।

कृत्तिकानां मघानां च रोहिण्याश्च विशाखयोः ।
एतेषामुत्तरो मार्गो नागवीथीं तु तां विदुः ॥
यदिमं मार्गमास्थाय चन्द्रमा विनिवर्त्तते ।
सा वर्षा उत्तमा ज्ञेया योगक्षेमं तथैव च ॥

विष्णुधर्मोत्तरे तु ।

चन्द्रमा ग्रहाणां समागमे उदग्गतः शस्यत

यथासम्भवचन्द्रनक्षत्राणां समागमे तत्रैव ।

समागमे ग्रहाणां च चन्द्रमाः शस्यते ह्युदः
नक्षत्राणां च राजेन्द्र दक्षिणेन न शस्यते ।

षट्कर्णिकायाम् ।

उदगिष्टः सर्वेषां *पित्र्येशविशाखयोश्चान्तः

पराशरस्तु ।

मघानुराधाभ्यां मध्ये गमनमभिशोभनम् । तथा
रतोऽभिवर्षकरः । मैत्रसावित्राभ्यां प्रजाहितकारी इति

* चित्राम्बविशाखयोश्चान्तः इति ख. ।

वराहसंहितायाम् ।

पित्र्यमैत्रपुरुहूतविशाखात्वाष्ट्रमेत्य च युनक्ति शशाङ्कः ।
दक्षिणेन न शुभः शुभकृत् स्याद्यद्युदक् चरति मध्यगतो वा ॥

तथा ।

भानोर्यथा सन्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः ।
प्रदक्षिणं तच्छुभदं नृपाणां याम्येन यातो न शुभः शशाङ्कः ॥

तदिति उत्तरायणम् । प्रदक्षिणमित्युच्यते । नक्षत्राणि ग्रहाँश्च सुदक्षिणतः कृत्वा गमनात् ।

तथा च ऋषिपुत्रः ।

दक्षिणेनापसव्यः स्यादुत्तरेण प्रदक्षिणः ।
ग्रहाणां चन्द्रमा ज्ञेयो नक्षत्राणां तथैव च ॥

वृद्धगर्गश्च ।

नक्षत्रस्य ग्रहाणां वा यदा तूत्तरतः शशी ।
तत्प्रदक्षिणमित्याहुर्भवेत् क्षेमसुवृष्टये ॥
नक्षत्रस्य ग्रहाणां वा यदा दक्षिणतो व्रजेत् ।
अपसव्यस्तथैव स्यादवृष्टिभयलक्षणम् ॥

आर्यां *वराहः ।

भवति विशाखाद्यानां याम्येन पापदृश्चन्द्रः ।

आर्यां तु ।

दक्षिणपार्श्वेन गतः शशी विशाखानुराधयोः पापः ।

ऐन्द्रस्य शीतकिरणो मूलाषाढाद्वयस्य चायातः ।
याम्येन बीजजलचरकाननहा वह्निभयदश्च ॥

स्तु ।

ज्येष्ठामूलाप्यविश्वानां दक्षिणेन व्रजेच्छशी ।

*एतस्य भूमिकाऽवलोक्येति ।

वैश्वानरः स्मृतो मार्गो दक्षिणो भयवैरकृत् ॥
देवो न वर्षति तदा शस्यं चैवोपहन्यते ।
वाय्वग्निकोपो भवति क्षुधामृत्युश्च जायते ॥

भार्गवीये तु ।

वैश्वानरपथं प्राप्तः समुद्रमपि शोषयेत् ।

गर्गः ।

त्वष्टुरैन्द्रस्य मैत्रस्य कृत्तिकानां च दक्षिणम् ।
विशाखयोर्मघानां च अजवीथीं शुभां विदुः ॥
अजवीथीं गते चन्द्रे शस्त्रं भ्रमति नित्यशः ।
क्षुन्निमित्तं च सहसा जायते जनमारकः ॥
विहन्याद्धनधान्यानि बलवत्त्वं च संभ्रयम् ।
क्षुध्यन्ति चात्र भूतानि देवश्चैव न वर्षति ॥

पराशरस्तु ।

ज्येष्ठाश्लेषामैत्रत्वाष्ट्राणां दक्षिणश्चरन् क्षुच्छस्त्रभयदः । उ
परिष्टाद्वैरोधिको धान्यनाशी च मघानुराधयोः । शि[illegible]ष्मे
क्षिणेनाशुभदो वर्षास्वनर्घकरः । सर्वर्क्षेषु नैर्ऋतावाप्यवैश्व
इति ।

आषाढमासिकरोहिणीयोगे तु विशेषो वराहसंहितायाम् ।

प्राजेशमाषाढतमिस्रपक्षे क्षपाकरेणोपगतं समी
वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद्ग्रहनि
स्पृशन्नुदग्याति यदा शशाङ्कस्तदा सुवृष्टिर्बहुलोपस
स संस्पृशन् योगमुदक्समेतः करोति वृष्टिं विपुलां

पराशरः ।

रोहिणीनां प्राक् पश्चादनुगमनं चन्द्रमसो वर्षा
पार्श्वयोर्विपर्ययः ।

वराहसंहितायाम् ।

उदितं यदि शीतदीधितिं प्रथमं पृष्ठत एति रोहिणी ।
शुभमेव तदा स्मरातुराः प्रमदाः कामवशे च संस्थिताः ॥
अनुगच्छति पृष्ठतः शशी यदि कामी वनितामिव प्रजाम् ।
मकरध्वजबाणखेदिताः प्रमदानां वशगास्तदा नराः ॥
प्राजेशानिलदिक्स्थिते हिमकरे संस्पृश्य मध्यस्थयो-
र्याते स्थाणुदिशं गुणास्तु बहवः शस्यार्घवृष्ट्यादयः ।
आग्नेय्यां दिशि चन्द्रमा यदि भवेत् तत्रोपसर्गो महान्
नैर्ऋत्यां समुपद्रुतानि विलयं शस्यानि यान्तीतिभिः ॥
दूरगो निकटगोऽथ वा शशी दक्षिणे पथि यथातथास्थितः ।
रोहिणीं यदि युनक्ति सर्वथा कष्टमेव जगतो विनिर्दिशेत् ॥
ताडयेद्यदि च योगतारकामीवृणोति वपुषा यदाऽपि च ।
ताडने भयमुशन्ति दारुणं छादनैर्नृपवधोऽङ्गनाकृतः ॥
रोहिणीशकटमध्यसंस्थिते चन्द्रमस्यशरणीकृता जनाः ।
क्षिप्रं यान्ति शिशुयाचिता जनाः सूर्यतप्तपिठराम्बुपायिनः॥

पराशरः।

शकटभेदे दुर्भिक्षानावृष्टिरीतिभयम् । शृङ्गोल्लेखने शस्त्रकोपः ।
उभयशृङ्गव्यत्यङ्गे जनमारः । शुक्रबृहस्पतिबुधसंयोगे शूकधान्य-
तिलमाषविनाशः । शौरस्य मध्यदेशाभावः । भौमस्य शस्त्रकोपः ।
केतोर्भयदुर्भिक्षप्रादुर्भावः ।

वराहसंहितायाम् ।

दृश्यते न यदि रोहिणीगतश्चन्द्रमा नभसि तोयदावृते ।
क्षुभः महदुपस्थितं तदा भूश्च भूरिजलशस्यसंवृता ॥

[illegible] योगे वराहसंहितायाम् ।

यद्रोहिणीयोगफलं तदेव स्वातावषाढासहिते च चन्द्रे ।
आषाढशुक्ले निखिलं विचिन्त्यं योऽस्मिन् विशेषस्तमहं प्रवक्ष्ये ॥

शुक्लग्रहणमाषाढमासिककृष्णप्रतिपत्प्रभृति आषाढयोगव्यावृत्त्यर्थम् ।

समुत्तरेण तारा चित्रायाः कीर्त्यते ह्यपांवत्सः ।
तस्यासन्ने चन्द्रे स्वातेर्योगः शिवो भवति ॥

पराशरस्तु ।

प्राङ्मध्यपश्चाद्भागेष्वाषाढानां योगः शशिनो वर्षासु तत्कालमेव । वर्षासु वैश्वदेवादुत्तरतः शशी वर्षाकरो न दक्षिणतः ।

अपि च ।

सोदकं सातपं साभ्रं सविद्युत् स्तनयित्नुवान् ।
प्रवातं च निरावातं प्रशस्तं तदहः स्मृतम् ॥

भार्गवीये ।

बुधाङ्गिरोऽङ्गारकसौरभार्गवान् प्रदक्षिणं याति निशाकरो यदा ।
अनामयत्वं नृपसौख्यमुत्तमं विपर्यये चापि महान् जनक्षयः ॥

वराहसंहितायाम् ।

चन्द्रमा यदि कुजस्य यात्युदक् पार्वतीयबलशालिनः जयः ।
क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुंधरा ॥

वृद्धगर्गस्तु ।

प्रदक्षिणं यदा कुर्यात् सोमो भूमिसुतं ग्रहं ।
विवर्धते तदा क्षेत्रमैश्वर्यधनधान्यतः ॥
उद्योगस्थाश्च राजानो योधाश्च बलशालिनः ।
जयन्ति पर्वतीयाश्च भूश्च शस्यवती तथा ॥

वराहसंहितायाम् ।

उत्तरतः स्वसुतस्य शशाङ्कः पौरजयाय सुभिक्षकरश्च ।
शस्यचयं कुरुते जनहार्दिं कोपचयं च नराधिपानाम् ॥

वृद्धगर्गस्तु ।

आत्मजं तु यदा सोमो बुधं कुर्यात् प्रदक्षिणम् ।
तदा वर्षति वै सोमः प्रीतिर्लोके च वर्धते ॥
धनधान्यकोषवृद्धिर्धान्यानां च न संशयः ।
आयोधनादृते चापि नागराणां जयं वदेत् ॥

धान्यानां माषमुद्गादीनामित्यर्थः ।

वराहसंहितायाम् ।

बृहस्पतेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम् ।
धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षो मुदिताः प्रजाश्च ॥

वृद्धगर्गः ।

यदा बृहस्पतिं सोमः कुरुतेऽथ प्रदक्षिणम् ।
क्षेमं सुभिक्षमारोग्यं धर्मश्चातिविवर्धते ॥
विद्वांसो मध्यदेशश्च ब्रह्मक्षत्रं च वर्धते ।
नागराणां जयश्चोग्र आगन्तूनां पराजयः ॥

वराहसंहितायाम् ।


भा[illegible]स्य यदि याम्युदक् शशी कोषयुक्तगजवाजिवृद्धिदः ।
[illegible]यिणां च विजयो धनुष्मतां शस्यसम्पदपि चोत्तमा तदा ॥

वृद्धगर्गस्तु ।

[illegible]भृगोः पुत्रं यदा शुक्रं सोमः कुर्यात् प्रदक्षिणम् ।
[illegible]यानां सम्पदं क्षेमं वर्षं वा तत्र निर्दिशेत् ॥
[illegible]ष्मन्तो विमुक्ताश्च हस्त्यश्वरथयायिनः ।
[illegible]मुयुक्ताश्च राजानो विजयन्ते च नागराः ॥

[illegible]तायाम् ।

[illegible]स्य शशी प्रदक्षिणं कुर्याच्चेत् पुरभूभृतां जयः ।
[illegible]ौहिकसिन्धुपह्लवा मुद्भाजो जवनैः समन्विताः ॥



वृद्धगर्गस्तु ।

यदा शनैश्चरं सोमः कुरुतेऽभिप्रदक्षिणम् ।
वर्धन्ते नागरा योधा यायिनामभयं ध्रुवम् ॥
ह्रियते चाशु धान्यार्घः सुभिक्षं चोपजायते ।
एतदेव विपर्यस्तं याम्येन गमने वदेत् ॥

वराहसंहितायाम् ।

शशिनि फलमुदक्स्थे यद्ग्रहस्योपदिष्टं
भवति तदपसव्ये सर्वमेतत् प्रतीपम् ।
इति शशिसमवायाः कीर्त्तिता भग्रहाणां
न खलु भवति युद्धं सार्धमिन्दोर्ग्रहर्क्षैः ॥

अथ शृङ्गाभिमर्दनम् । तत्र पराशरः ।

शृङ्गाभिमर्दने गुरुः प्रधाननृपतिविनाशाय । असुरगुरुर्यायिनाम् । कुनृपाणां प्रत्यन्तनृपाणां भौमः । शौरः क्षुच्छस्त्रभयाय । दुर्भिक्षायावृष्टये सौम्यः ।

वराहसंहितायाम् ।

प्रत्यन्तान् कुनृपाँश्च हन्त्युडुपतिः शृङ्गे कुजेना ते
शस्त्रक्षुद्भयकृद्यमेन शशिजेनावृष्टिदुर्भिक्षकृत् ।
श्रेष्ठान् हन्ति नृपान् महेन्द्रगुरुणा शुक्रेण चाप्यान् नृपान्
शुक्रे याप्यमिदं फलं ग्रहकृतं कृष्णे यथोक्तं गमः ॥

हरिवंशमत्स्यपुराणपद्मपुराणेषु हिरण्यकशिपुवधनिमित्तम् ।

"सोमस्य गगनस्थस्य ग्रहास्तिष्ठन्ति शृङ्गगाः ।
वामे च दक्षिणे चैव स्थितौ शुक्रबृहस्पतो" * ॥

आग्नेयपुराणे च ।

सोमस्य गगनस्थस्य ग्रहास्तिष्ठन्ति शृङ्गग ।

* ४६ अ. ११-१३ श्लो. ।

वामशृङ्गोच्छ्रितः शृङ्गो दक्षिणे च बृहस्पतिः ॥

पराशरः ।

वामेन्दुशृङ्गोन्नमनं ज्वलनं वा नृपनाशाय ।

अथ भेदनम् । तत्र भौमभेदनमाह ।

पराशरः ।

क्षितिसुतभिन्नः कुरुशिविमालवत्रिगर्त्तकुलिन्दायोध्याधिपणाधिपतींश्च यायिभिः सह षण्मासानुपतापयति ।

वराहसंहितायाम् ।

उद्युक्तान् सह वाहनैर्नरपतींस्त्रैगर्त्तकान् मालवान्
*कौण्डिन्यान् गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान् ।
हन्यात् कौरवमत्स्यशुक्त्यधिपतीन् राजन्यमुख्यानपि
प्रालेयांशुरसृग्ग्रहे तनुगते षण्मासमर्यादया ॥

अथ बुधभेदनम् । वराहसंहितायाम् ।

मगधान् मथुरां च पीडयेद्वेणायाश्च† तटं शशाङ्कजः ।
अपरत्र कृतं युगं वदेद्यदि भित्त्वा शशिनं विनिर्गतः ॥

‡ अपरत्र कृतं युगमिति सत्ययुगस्येव व्यवहारो भवतीति तात्पर्यम् ।

तथा च पराशरः ।

बुधभिन्नः सुभिक्षक्षेमकरः ।

अथ बृहस्पतिभेदनम् । तत्र पराशरः ।

आङ्गिरसगुरुणा दश मासान् गान्धारवशाति*शिन्धुवाह्लीकपार्वतिकाम्बष्ठकारस्करान्–इति ।

[illegible]ति सम्बन्धः ।

[illegible]हसंहितायाम् ।

गान्धारसैन्धवीरकसिन्धुकोरान् धान्यानि शैलान् द्रविडाधिपाँश्च ।

---

* [illegible]न् इति ख. । † वेलायाश्च इति ख. ।

‡ [illegible]वशीति-इति ख. । गान्धारवसतिम् इति ग. ।

द्विजाँश्च मासानथ शीतरश्मिः संतापयेद्वाक्पतिना विभिन्नः ॥

अथ भार्गवभेदनं वराहसंहितायाम् ।

भिन्नाः सितेन मगधान् यवनान् पुलिन्दान्
नेपाल वंशकुरुक*च्छसुराष्ट्रमद्रान् ।
पाञ्चालकैकयकुलूतक पौरुषादान्†
हन्याद्युशीनरजनानपि सप्तमासान् ॥

पराशरस्तु ।

असुरगुरुभिन्नः पाञ्चालमगधकुलिन्दकुलूतककैकययवनधूम्राम्बष्ठवङ्गनगराङ्गनाराज्यभृङ्गिभरुकच्छो‡शीनरपुलिन्दपुरुषार्दनेपालान् सप्तमासानुपतापयति ।

अथ शनिभेदनम् । वराहसंहितायाम् ।

यौधेयान् शचिवान् सकौरवान् यूथेशानथ चार्जुनायनान् ।
विनिहन्त्यर्कजभिन्नमण्डलः शीतांशुर्दशमासपीडया ॥

यूथेशान् वृन्देशान् ।

पराशरः ।

अर्कसूनुसंभेदे नृपतिविरोधामात्यभेदगणपयौधेयार्जुनायनभयानावृष्टिप्रादुर्भावाश्च दशमासान् ।

अथ केतुभेदनम् । वराहसंहितायाम् ।

क्षोमारोग्यसुभिक्षविनाशी शीतांशुः शिखिना यदि भिन्नः ।
कुर्यादायुधजीविविनाशं चौराणामधिकेन च पीडाम् ॥

अथ तामसकीलका वराहसंहितायाम् ।

तामसकीलकसंज्ञा राहुसुताः केतवस्त्रयस्त्रिंशत् ।
ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः ॥
ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि

---

* वंशतरुकच्छ-इति ख. । भृङ्गिभरुकच्छ इति अ. । † पुरुषान् इति अ. ।
‡ तरुकच्छो-इति घ. । भरुकच्छो-इति ग. । § प्राणिरा-इति अ. ।

अथ द्विचन्द्रादिर्विष्णुधर्मोत्तरे ।

द्विचन्द्रे ब्राह्मणाधिक्यमाधिक्यं प्रलयाय तु ।

प्रलयायेति लोकस्य प्रलयाय न तु ब्राह्मणमात्रस्य ।
तथा च वराहसंहितायाम् ।

दिवि भाति यदा तुहिनांशुयुगं द्विजवृद्धिरतीव तदाऽऽशु शुभा ।
तदनन्तरवर्णरणोऽर्कयुगे जगतः प्रलयश्चिचतुष्प्रभृति ॥

भाति शोभते कान्तिमत् स्निग्धं च भवतीत्यर्थः ।
अतश्च ।

द्विचन्द्रं गगनं दृष्ट्वा ब्रूयाद्ब्रह्मवधो महान् ।

इति भार्गवीयवाक्यम् ।

द्विचन्द्रं गगनं दृष्ट्वा त्र्यहाद्ब्रह्मवधं वदेत् ।

इति गार्गीयवाक्यं च रूक्षविरश्मिद्विचन्द्रपरम् । ब्रह्मवधो ब्राह्मणानां विनाशः ।
अथ लक्ष्मविकृतिः । तत्र मौष्मपर्वणि कुरुपाण्डवसैन्यवधनिमित्तम् ।

"व्यावृत्तं लक्ष्म सोमस्य भविष्यति महद्भयम्"* ।

आश्वमेधिके सैन्धवपराजयनिमित्तम् ।

"शशं चाशु विनिर्भिद्य मण्डलं शशिनोऽपतत्"† ।

बृहत्संहितायां वराहः ।

[illegible]तो व्याख्याता येऽर्के चन्द्रे च ते विनिर्देश्याः ।
[illegible] भवन्ति याप्याः कृष्णेऽधिकपापफलदास्ते ॥

बृहत्संहितायां वराहः ।

शुक्ले पक्षे संप्रवृद्धे प्रवृद्धिं व्रजक्षत्रं याति वृद्धिं प्रजाश्च ।
हीने हानिस्तुल्यता तुल्यतायां कृत्स्नं तत् फलं व्यत्ययेन ॥

अत्रोक्तविशेषशान्तिषु चन्द्रोत्पाते चन्द्रपूजापूर्विका प्रभूत-[illegible]गोपहोदानादिका शान्तिरौत्पातिकफलगुरुलाघवमवग-[illegible]र्णिया ।

[illegible]वमुक्ता विशेषशान्तयश्चन्द्रोत्पाताः ।

* [illegible]अ. २ श्लो. ।

† [illegible]अ. १० श्लो. ।

मयूरचित्रे ।

चन्द्रो रक्तः समो राज्ञो देशस्य च विनाशकः ।
युवराजस्य सेनान्यो वधमाहुस्तथैव च ॥
अधर्मिष्ठाः प्रजाश्च स्युः शान्तिश्च प्रथमैव तु ।
यदा चन्द्रमसः पार्श्वे दृश्यते प्रतिचन्द्रिका ॥
त्रिरात्रं जायते वृष्टिर्मासार्धेन महद्भयम् ।
तत्र साधारणी शान्तिः कर्त्तव्या गर्गभाषिता ॥

गार्गीये ।

पाकः सोमस्य मासिकः ।

इति महाराजाधिराजनिश्शङ्कशङ्करश्रीमद्बल्लालसेनदेवविरचितेऽद्भुतसागरे चन्द्राद्भुतावर्त्तः ।

अथ राहोरद्भुतावर्त्तः ।

रविचन्द्रग्रहणनिमित्तान्याह वृद्धगर्गः ।

अष्टम्यां परिवेषः स्यात् तैले जलगते यदा ।
प्रसारिते विजानीयाद्यतः खण्डस्ततस्तमः ।
पञ्चग्रहाणां संयोगं न दृष्ट्वा ग्रहणं वदेत् ।
यदि न स्याद्ध्रुवस्तत्र तं दृष्ट्वा ग्रहणं वदेत् ।

एतद्ध्रुवं लक्षयति न [illegible] वराहसंहितायाम् ।

पञ्चग्रहसंयोगाद्यस्मिन् ग्रहणस्य सम्भवो भवति
तैलं च जलेऽष्टम्यां न विचिन्त्यमिदं विपश्चिद्भिः—इति ॥

निमित्तान्तराण्यपि मुक्तकण्ठेनाह वृद्धगर्गः । तद्यथा ।

सूर्येन्दुग्रासोरुचैः कृताद्भुतार्पणस्पन्दनवेपनमः परिम[illegible]
वर्णैर्मरीचिमण्डलसंग्रहैस्तिमोरजोधूमाभ्रराहुतत्वापा-

ण्डुरवप्रतिसूर्यकाककीलकबन्धपरिवेषदर्शनानि क्रूरभैरवपक्षिसङ्घानां निनादः श्वानः श्वापदा ऊर्ध्वमुखाः सततं त्रासिनः। शर्करार्कर्षिणश्च वाता भूकम्पो निर्घातोल्का तारकाणां पतनानि वाऽभीक्ष्णं विद्युत्पाता गवां क्षीरिणां च क्षीरपरिहानिः—इति।

उत्सर्पणं विपरीतगमनम्। स्पन्दनं किञ्चिच्चलनम्। वेपनं कम्पनम्। पराशरस्तु।

ग्रहणनिमित्तानि उल्कापातसन्ध्यादिग्दाहभूमिकम्पाशनिवज्रनिर्घातस्तनयित्नुपांशुवृष्टिविषमवातशीतोष्णविकृतानि। वज्रकनकरजतमणीनां प्रभाभङ्गोऽभ्रलेखासंदर्शनमर्कमण्डलोत्थितायाः कृष्णराज्याः सोमानुप्रवेशः शश्वच्च शिवाश्चगणरुतविकृतं नीचैरभ्रविसर्पणं रश्मिजालव्याकुलत्वं नभोऽम्भसामशीतत्वम्। क्षीरिणां क्षयोऽकस्मान्माल्यम्लानिः पञ्चताराग्रहोदयो रोहिणीपीडनं चन्द्रग्रहणेऽर्कविकृतिरर्कग्रहणे चन्द्रमसो बलवन्मध्यतनु* निमित्तहेतुकारणानि सर्वार्धकिंचिद्ग्रहणोयान्यानुपूर्व्या यतो निमित्तोत्पातस्ततो [illegible] यत एषामपसरणं ततो मोक्षः—इति।

गजदन्तवो[illegible] राजपुत्रः।

[illegible]नी भासे विषाणे तु तथा लोहितसप्रभे।
[illegible]ठसोमग्रहं विद्याल्लोहितेऽर्कग्रहं विदुः॥

[illegible] ग्रहणनिमित्तानि। तत्र पराशरः।

[illegible]यस्य वेपनं परिवेषणं दीनमन्दरश्मिताकृष्णकल्माषभावः—इति।

[illegible] ग्रहणनिमित्तानि। तत्र वृद्धगर्गः।

[illegible]मस्योदये शृङ्गयोः खण्डच्छिन्नव्यापिद्वैधीभावाः।

[illegible]।

[illegible]सस्तावत् प्रस्पन्दनं शशव्यावृत्तिर्दैन्यं पाण्डुत्वं सतत-

—इति ध.।

परिवेषणमचिरोदितज्योत्स्नापराभङ्गः* क्षीणता दक्षिणशृङ्गतैमिर्येतरस्यात्यर्थमुत्तुङ्गता हिर्भावश्च–इति ।

वृद्धगर्गः ।

एवमादीनि निमित्तान्यूर्ध्वमष्टम्या राहोरागमनानि ब्रूयात्–इति ।

भार्गवीये तु ।

चन्द्रग्रहणनिमित्तानि शुक्लपक्षाष्टमीपरम् ।
पौर्णमासीं च दृश्येरन् सूर्यस्य च तथेतरत् ॥

पराशरस्तु ।

शुक्लपक्षाष्टमीपञ्चदश्योरन्तरा ग्रहणनिमित्तानीन्दुभान्वोः प्रबलीभवन्ति ।

वृद्धगर्गः ।

रूक्षैः† क्रूरैः सुबहुभिर्ग्रहणं क्रूरमादिशेत् ।
मध्यैर्मध्यं भवेदेवं सौम्यैश्च शुभदो ग्रहः ॥

एतदपि च वराहेण दूषितम् ।

न कथञ्चिदपि निमित्तैर्ग्रहणं विज्ञायते निमित्तानि ।
अन्यस्मिन्नपि काले भवन्ति चोत्पातरू[illegible]ग ॥

न विज्ञायतेऽवश्यमिन्दुग्रहणं भविष्यतीति निश्चयो नोत्पद्य[illegible]त्यर्थः । यतः कदाचिद्ग्रहणसूचकान्यप्येतानि भवन्ति कदाचित् फलान्तरसूचका[illegible] । यदा चैतेषां दर्शनानन्तरं ग्रहणं भवति तदैतेषां पृथक् फलता । ग्रहणस्यैव फलत्व[illegible] ।

तथा च वराहसंहितायाम् ।

न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनं [illegible]दि वा–इति ।

अथ शुभसूचकराहुलक्षणं भार्गवीये ।

स्निग्धवर्णो यदाऽर्चिष्मान् पर्वस्थो लेहवान् ग्रहः ।
क्षिप्रं वाऽप्युदितग्राही सर्वभूतहिताय सः ।

पर्वस्थ इत्यनेन पर्वग्रहणमित्यर्थः । लेहो ग्रासविशेषः । क्षिप्रग्रहीते शीघ्रं गृहीत्वा मुञ्चतीत्यर्थः । उदितग्राहीति अस्तोदयास्तनिवृत्त्यर्थम् ।

---

* अचिरोदितोल्काप्रभाभङ्गः–इति घ. । † रूपैः–इ. ञ. ।

वृद्धगर्गस्तु ।

अल्पावलेही शीघ्रश्च स्निग्धः कृष्णः प्रदक्षिणः ।
राहुः प्रजाहितो ज्ञेयः क्षेमारोग्यसुभिक्षकृत् ॥

वटकणिकायां तु ।

यातोऽपसव्यमसुरः परिपेलवश्च
शीघ्रं गतोऽल्पशकलं यदि वा बलीज्यः ।
सञ्छादनं* विबुधमन्त्रिनिरीक्षितो वा
ताराग्रहैरसहितो हितकृत् प्रजानाम् ॥

अपसव्यं प्रदक्षिणम् । परिपेलवः स्वच्छः । संछादनं *ग्रासविशेषः । येषामयं स्वामी तेषामेवम्भूतो विशेषेण हितकृत् । विपरीतो विशेषेण विपरीतः ।

राहुस्वामिकानि वटकणिकायाम् ।

राहोः कृतघ्नकुलपांसननीचशूद्रा
वोक्कणशूलिकनियुद्धविदुग्रकोपाः ।
गोमायुभक्षगिरिदुर्गनिवासिनश्च
गर्तस्थहिंस्रपरदाररताः खलाश्च ॥

काश्यपस्तु ।

बुभुक्षितास्तीक्ष्णकोपा विभिन्नाः कुलपांसनाः ।
नीचम्लेच्छादिजातीयाः दरदाः† पारदारिकाः‡ ॥
सत्यधर्मविहीनाश्च गिरिस्थाः कन्दरास्थिताः ।
प्रजाताः सर्वहीनाश्च श्वशृङ्गालाः¶ महाशनाः ॥
तिलाश्च बाहुयुद्धज्ञा मापाश्चौराः खराश्चराः ।
यज्ञान् हिंसन्ति ये नित्यं राहुस्तेषामधीश्वरः ॥

वराहसंहितायाम् ।

गिरिशिखरकन्दरदरीविनिविष्टा म्लेच्छजातयः शूद्राः ।

---

* संछदनम् इति ख. । † नीचा म्लेच्छोत्सादकाश्च गर्त्तस्थाः इति अ. ।
‡ अपकारकाः इति ख. । § भ्रातापासत्य-इति अ. । ¶ शृगालादा इति अ. ।

गोमायुभक्षशूलिकवोक्काणश्वमुखविकलाङ्गाः ॥
कुलपांसनहिंस्रकृतघ्नचौरनिःसत्यशौचहीनाश्च* ।
खरचरनियुद्धवित्तीव्ररोषगर्त्ताशया नीचाः ॥
उपहतदाम्भिकराक्षसनिद्रावहुलाश्च जन्तवः सर्वे ।
धर्मेण च संत्यक्ता निष्पावाश्चार्कशशिशत्रोः ॥

अथ चन्द्रादिपर्वफलं वटकणिकायाम् ।

वृद्ध्या षाण्मासिक्या पतयः स्युः पर्वणां क्रमशः ।
ब्रह्मेन्दुशक्रधनपतिवरुणहुताशान्तका राहोः ॥

पराशरस्तु ।

अतः परं सप्तविधं पर्वानुक्रमिष्यामः । ब्राह्मसौम्येन्द्रकौवेरवारुणाग्नेययाम्यानि षण्मासान्तराणि सप्त भवन्ति । तेऽत्र ब्राह्मं शस्यजनम् । तद्वत् सौम्यं क्षेमारोग्यकरम् । ऐन्द्रं भूपालविरोधाक्षेमदुर्भिक्षफलम् । कौवेरमीश्वराणामैश्वर्यविनाशनं क्षेमशस्यकृच्च । वारुणं वृष्टिशस्यक्षेमारोग्यकरम् । आग्नेयमग्निशस्त्रकृत्* । अनावृष्टये याम्यं च ।

वराहेण त्वाग्नेये शुभफलमुक्तम् । वटकणिकायाम् । तद्यथा ।

ऐन्द्रमहितं प्रजानां याम्यं चान्यानि शिवसुभिक्षाय ।

बृहत्संहितायाम् ।

ब्रह्मे द्विजपशुवृद्धिः क्षेमारोग्याणि शस्यसम्पच्च ।
तद्वत् सोम्ये तस्मिन् पीडा विदुषामवृष्टिश्च ॥
ऐन्द्रे भूपविरोधः शारदशस्यक्षयो न च क्षेमम् ।
कौवेरेऽर्थपतीनामर्थविनाशः सुभिक्षं च ॥

---

* दानाश्च इति अ, । तत्र निःसत्याः सत्यरहिताः । निःशौचाः शौचरहिताः । निर्दाना दानरहिता इत्यर्थः । † माषतिला-इति अ, ।

*)आग्नेयमन्नक्षयदम् । दुर्भिक्षाल्पवृष्टये याम्यन् इति अ,।

वारुणमवनीशाशुभमन्येषां क्षेमशस्यवृद्धिकरम् ।
आग्नेयं मित्राख्यं क्षेमारोग्याभयाम्बुकरम् ॥
याम्यं करोत्यवृष्टिं दुर्भिक्षं संक्षयं च शस्यानाम् ।
यदतः परं तदशुभं क्षुन्मारावृष्टिदं पर्व ॥

अथाद्भुतसागरारम्भशकाब्दात् पर्वेश्वरगणनम् ।

खनवदशो-१०९०नशकाब्दा द्विगुणाः कार्यारवावुदग्गोले ।
सशरा ५ याम्येऽजाद्याः पर्वेशाः सप्तभिः शिष्टाः ॥

अथायनफलं वराहसंहितायाम् ।

द्विजनृपतीनुदगयने विट्शुद्रान् दक्षिणायने हन्ति ।

नृपतिशब्दोऽयं क्षत्रियपरः ।
तथा च वटकणिकायाम् ।

द्विजराजन्यान् हन्यादुदगयने दक्षिणे तु विट्शूद्रान् ।

काश्यपश्च ।

उत्तरायणसंदृष्टो ब्रह्मक्षत्रविनाशनः ।
दक्षिणायनगे राहुर्वैश्यशूद्रप्रमर्दनः ॥

दक्षिणायनगे कर्कटादिषडाश्रिगते चन्द्रे सूर्यं वा दृष्टो राहुरिति सम्बन्धः ।
अथ मासफलं वटकणिकायाम् ।

आश्वयुजमाघकार्त्तिकभाद्रपदेष्वागतः सुभिक्षकरः ।
राहुरवशिष्टमासेष्वशुभकरो वृष्टिशस्यानाम् ॥

पराशरस्तु ।

वैशाखेऽश्मकपौण्ड्रोड्रम्लेच्छसौराष्ट्रेषु वृक्षशस्याभावाय ।

वराहसंहितायां तु ।

वैशाखमासि ग्रहणे विनाशमायान्ति कार्पासतिलाः समुद्गाः ।
इक्ष्वाकुयौधेयशकाः कलिङ्गाः सोपद्रवाः किन्तु सुभिक्षमस्मिन् ॥

वृद्धगर्गस्तु ।

क्षेमं भवति शस्यं च वैशाख्यां यदि गृह्यते ।

भयमेति तथेक्ष्वाकुर्मांया च सह मालवैः ॥
कार्पासतिलमुद्गानां शाखानां च महीरुहाम् ।
सुभिक्षं जायते तत्र उत्तरा वलवत्तराः ॥

पराशरः ।

ज्येष्ठे ज्येष्ठनृपनृपपत्नीगणमुख्यशस्योपद्रवाय ।

वृद्धगर्गस्तु ।

ज्येष्ठाः श्रेष्ठाश्च पीड्यन्ते ज्येष्ठ्यामुपगते ग्रहे ।

वराहसंहितायां तु ।

ज्येष्ठे नरेन्द्रद्विजराजपत्न्यः
शस्यानि वृष्टिश्च महागणाश्च ।
प्रध्वंसमायान्ति नराश्च सौम्याः
सान्त्वैः* समेताश्च निषादसंज्ञाः ॥

वृद्धगर्गस्तु ।

आषाढपौर्णमास्यां तु गृहीते रजनीकरे ।
क्वचिद्वर्षति पर्जन्यस्तथा शाल्वं निपातयेत् ॥

पराशरस्तु ।

शाल्वनिषादवृष्टिशस्यघ्नमाषाढे ।

वराहसंहितायां तु ।

आषाढपर्वण्युदपानवघ्नदीप्रवाहान् फलमूलवर्त्तान् ।
गान्धारकाश्मीरपुलिन्दचीनान् हतान् वदेन्मण्डलवर्षमस्मिन् ॥

वृद्धगर्गः ।

श्रावण्यां पौर्णमास्यां तु गृहीते रजनीकरे ।
योगक्षेमविनाशश्च शस्यनाशश्च जायते ॥

पराशरस्तु ।

श्रावणे च क्षेममुभिक्षमन्यत्र चीनकाश्मीरपुलिन्दगान्धारेभ्यः

---

* सौख्यैः इति ख. । साल्वैः इति अ. ।

वराहसंहितायाम् ।

काश्मीरान् सपुलिन्दचीनयवनान् हन्यात् कुरुक्षेत्रजान्
गान्धारानपि मध्यदेशसहितान् दृष्टो ग्रहः श्रावणे ।
काम्बोजैकशफाँश्च शारदमपि त्यक्त्वा यथोक्तानिमा-
नन्यत्र प्रचुरान्नवृष्टिमनुजैर्धात्रीं करोत्यावृताम् ॥

वृद्धगर्गः ।

प्रौष्ठपदे गृहीते तु प्रावृड्भवति पुष्कला* ।
क्षेमं तु वङ्गमगधकाश्मीरदरदान् प्रति ॥

पराशरस्तु ।

भाद्रपदे मगधदरदकलिङ्गवङ्गानपास्य शस्यक्षेमाय च ।

वराहसंहितायाम् ।

कलिङ्गवङ्गान् मगधान् सुराष्ट्रान्
म्लेच्छान् सुवीरान् दरदान् शकाँश्च ।
स्त्रीणां च गर्भानसुरो निहन्ति
सुभिक्षकृन्भाद्रपदेऽभ्युपेतः ॥

वृद्धगर्गः ।

क्षेमं भवति शस्यं च गृहीतेऽश्वयुजि ग्रहे ।

पराशरस्तु ।

अश्वयुग्ग्रहणे सुभिक्षक्षेमायावन्तिवाह्लीकचीनकाम्बोजसैन्ध-
वानामभावाय च ।

वराहसंहितायां तु ।

काम्बोजचीनयवनान् सह शल्यकुन्द्रि-
वाह्लीकसिन्धुतटवासिजनाँश्च हन्यात् ।
आनर्त्तपौण्ड्रभिषजश्च तथा किरातान्
दृष्टोऽसुरोऽश्वयुजि भूरिसुभिक्षकृच्च ॥

* निष्पला इति ख. ।

पराशरः ।
कार्त्तिके सुभिक्षक्षेमारोग्याय काशिकोशलशूरसेनाभावाय च ।
वराहसंहितायां तु ।
कार्त्तिक्यामनलोपजीविमगधान् प्राच्याधिपान् कोशलान्
कल्माषानथ शूरसेनसहितान् काशीं च संतापयेत् ।
हन्यादाशु कलिङ्गदेशनृपतिं सामात्यभृत्यं तमो
दृष्टं क्षत्रियतापनं जनयति क्षेमं सुभिक्षान्वितम् ॥
वृद्धगर्गः ।
पौर्णमास्यां यदा चन्द्रः कार्त्तिक्यामुपरज्यते ।
पौण्ड्रान् कलिङ्गान् मत्स्याँश्च शूरसेनाँश्च पीडयेत् ॥
काश्यपः ।
कार्त्तिके कोशला गावः प्रधानाश्चाहिताग्नयः ।
बाधन्ते गणमुख्याश्च क्षत्रिया गोमिनस्तथा ॥
सुवृष्टिर्जायते चापि शस्यसम्पत् तथोत्तमा ।
प्राच्यां दिशि भयं ब्रूयात् क्षेममन्यत्र निर्दिशेत् ॥
पराशरस्तु ।
मार्गशीर्षे मृगपौण्ड्रसोमपभयाय वृष्टये च ।
वराहसंहितायां तु ।
काश्मीरकान् कोशलकान् सपौण्ड्रान् मृगाँश्च हन्यादपरान्तकाँश्च ।
ये सोमपास्ताँश्च निहन्ति सौम्ये सुवृष्टिकृत् क्षेमसुभिक्षकृच्च ॥
सौम्ये मार्गशीर्षे ।
वृद्धगर्गस्तु ।
मार्गशीर्षे गृहीते तु क्षेमं शस्यं च नश्यति ।
पौराश्च भयमृच्छन्ति मृगाश्च सह सोमपैः ॥
औशीनरान् काश्यपाँश्च ब्राह्मणाँश्च तपः स्पृशेत् ।
ग्रीष्मे शस्यं च भवति शारदं चोपहन्यते ॥

पराशरः ।

पौषे भयदुर्भिक्षब्रह्मक्षत्रोपरोधाय ।

वराहसंहितायां तु ।

पौषे द्विजक्षत्रजनोपरोधः ससैन्धवाख्याः कुकुरा विदेहाः ।
ध्वंसं व्रजन्त्यत्र च मन्दवृष्टिर्भयं च विन्द्यादसुभिक्षयुक्तम् ॥

वृद्धगर्गस्तु ।

पौर्णमास्यां यदा पौष्यामुपरज्येत चन्द्रमाः ।
कुरवश्च विदेहाश्च फलमश्नन्ति दारुणम् ॥
मन्दा वृष्टिर्भवत्यत्र श्रेष्ठो वर्णो विनश्यति ।
अनयान्मन्त्रिणश्चैव पीडयन्ते नात्र संशयः ॥
पित्तज्वरोऽपि भवति श्रेष्ठः पञ्चत्वमृच्छति ।
महाबला महाविद्याः पीडयन्ते पशुवाहनाः ॥
कुक्षिरोगोऽतिसारश्च ज्वररोगश्च वर्धते ।

पराशरः ।

माघे शस्त्रप्रकोपप्रावृड्वृद्ध्ये वङ्गाङ्गानर्त्तयवनकाशिदेशोत्सादनकृत् ।

वराहसंहितायां तु ।

माघे तु मातृपितृभक्तवशिष्ठगोत्रान्
स्वाध्यायधर्मनिरतान् करिणस्तुरङ्गान् ।
वङ्गान् सकाशिमनुजाँश्च दुनोति राहु-
र्वृष्टिं च कर्षकजनानुमतान् करोति ॥

पराशरः ।

फाल्गुनेऽन्नसम्पच्च ।

वृद्धगर्गस्तु ।

फाल्गुन्यां कुरवश्चैव स्त्रियश्च सुभगास्तथा ।
दाक्षिणात्याश्च राजानः पीडयन्ते नात्र संशयः ॥

वराहसंहितायाम् ।

पीडाकरं फाल्गुनमासि पर्व बङ्गाश्मकावन्तिकमेकलानाम् ।
नृत्यज्ञशस्त्रप्रवराङ्गनानां धनुर्धरक्षत्रतपस्विनां च ॥

पराशरः ।

नटनर्त्तकधनुर्धरशस्त्रविनाशाय चैत्रे ।

वृद्धगर्गस्तु ।

पौर्णमास्यां यदा चैत्र्यां चन्द्रमा गृह्यते तदा ।
शस्यानि च प्रणश्यन्ति क्षेमं च सह कारुभिः ॥
लेखकाँश्चित्रशिल्पाँश्च सुमहानामयः स्पृशेत् ।

वराहसंहितायां तु ।

चैत्रे तु चित्रकरलेखकगेयसक्तान्
रूपोपजीविनिगमज्ञहिरण्यपण्यान् ।
पौण्ड्रोड्रकेकयजनानथ वाऽश्मकाँश्च
तापः स्पृशत्यमरपोऽत्र च चित्रवर्षी ॥

वृद्धगर्गः ।

पौर्णमासीषु यत् सोमे फलमेतदुदाहृतम् ।
एतदेव भवेदर्के त्वमावास्याफलं त्विति ॥

अथ राशिफलं वराहसंहितायाम् ।

पाञ्चालकलिङ्गशूरसेनाः काम्बोजौड्रकिरातशस्त्रवार्त्ताः ।
जीवन्ति तु ये ह्युताशवृत्त्या ते पीडामुपयान्ति मेषसंस्थे ॥
गोपाः पशवोऽथ गोमिनो मनुजा ये च महत्त्वमागताः ।
ते पीडामुपयान्ति भास्करे ग्रस्ते शीतकरेऽपि वा वृषे ॥
मिथुने प्रवराङ्गना नृपा नृपमात्रा बलिनः कलाविदः ।
यमुनातटजाश्च वाहिका मत्स्याः सुह्मजनैः समन्विताः ॥
आभीरान् शवरान् सपह्लवान् मल्लान् मत्स्यकुरून् शकानपि ।

पाञ्चालान् विकलाँश्च पीडयेदङ्गं चापि निहन्ति कर्कटे ॥
सिंहे पुलिन्दगणमेकलसिन्धुयुक्तान्*
राजपोमान् नरपतीन् वनगोचराँश्च ।
षष्ठे तु शस्यकविलेखकगेयसक्तान्
हन्त्यश्मकत्रिपुरशालियुताँश्च देशान् ॥
तुलाधरेऽवन्त्यपरान्त्यसाधून् वणिग्दशार्णान् मरुकच्छपाँश्च ।
अलिन्यथोदुम्बरमद्रचोलान् द्रुमान् सयौधेयविषायुधीयान् ॥
धन्विन्यमात्यवसुधाजि†विदेहमल्लान्
पाञ्चालवैद्यवणिजो विषमायुधज्ञान् ।
हन्यान्मृगे तु झषमल्लिकुलानि नीचान्
मन्त्रौषधीषु कुशलान् स्थविरायुधीयान् ॥
कुम्भेऽन्तर्गिरिजात्यपश्चिमजनान्‡भारोद्वहाँस्तस्करान्
आभीरान् दरदार्यसिंहलजनान्§हन्यात् तथा बर्बरान् ।
मीने सागरकूलसागरभवद्रव्याणि ¶मान्यान् जनान्
प्रज्ञान् वार्युपजीविनः शुभफलं कूर्मोपदेशाद्वदेत् ॥

अथ नक्षत्रफलं बटकणिकायाम् ।

कूर्मविभागेन वदेत् पीडां देशस्य वीक्ष्य नक्षत्रम् ।

पराशरस्तु ।

अश्विन्यामश्वानश्वजीविनश्च । याम्ये कलिङ्गान् दक्षिणाँश्चोपतापयति । कृत्तिकासु कलिङ्गमत्स्याधिपतीन् । रोहिण्यां क्षुच्छस्त्रकोपैः प्रजाः । मृगशिरसि शाल्वनिषादकैकेयान् । रौद्रे शकान् कुकुरान् पल्व-

---

* सह युक्तान्-इति अ. । † वरवाजि-इति अ. । वरराजि-इति ख. ।
‡ ऽन्तर्गिरिजान् सपश्चि-इति अ. । § सिंहपुरुकान्-इति अ. ।
¶ धन्यान् इति अ. । मान्यान्-इति ख. ।

लोपजीविनश्च । पुनर्वसौ पाण्डयभरुकच्छकार्पासाँश्च । पुष्ये गोमन्तसिधुसौवीरकुरुपाञ्चालान् । सार्पे काशिकलिङ्गसिंहलराजन्यान् । पित्र्ये दण्डकारण्यवासिनः पितृधान्यं च । भाग्येषु भगान् काम्बोजान् सुराष्ट्राधिपतिं च । आर्यम्णे मगधाङ्गयवनान् । हस्ते दशार्णान् । त्वाष्ट्रे मद्रान् कुरुक्षेत्रं च । वायव्ये काश्मीरोशीनरान् वाजिनश्च । विशाखयोर्वृक्षाश्मकान् । मैत्रे काशिकोशलान् । ज्येष्ठायां ज्येष्ठजातीयान् दरदाँश्च । मूले क्षुद्रकमालवयौधेयान् । आप्ये पञ्चनदान् सुवीराधिपतिं च । वैश्वदेवे आर्जुनायनपौण्ड्रशिविमालवान् । श्रवणे शाल्वानानर्त्तकाँश्च । वासवे धनिनः शकारण्यजाँ*श्च । वारुणे कैकेयान् जलचराँश्च । आजे अङ्गवङ्गमगधकुकुरान् । आहिर्बुध्ने अश्मकेक्षुक्षुद्रकत्रिगर्त्तान् । पौष्णे वैदेहानर्त्तकसिन्धुसौवीरान् ।

ज्यौतिषपराशरविष्णुधर्मोत्तरयोः ।

ग्रहोपश्लिष्टे नक्षत्रे ग्रहणं तु यदा भवेत् ।
तदा पीडा विनिर्देश्या सैनिकानां नृपैः सह ॥

अथ दिक्फलं तत्र पराशरः ।

उदग्दक्षिणप्रत्यक् ब्राह्मणक्षत्रियविट्शूद्रोत्सादनायानुपूर्व्या ।

काश्यपः ।

सौम्यपार्श्वगते विप्रान् पूर्वस्यां क्षत्रजातयः ।
वैश्यान् दक्षिणतो राहुर्हन्ति पश्चिमतोऽपरान् ॥

वटकणिकायां तु ।

उदगादिषु दिक्षु शुभो विप्रादीनां सितादिवर्णघ्नः ।

काश्यपः ।

पूर्वे सलिलजान्† हन्यात् पश्चाद्धन्यात् कृषीवलान् ।
याम्ये वरगजान् हन्ति सौम्ये गोनाशकृन्मतः ॥

---

* शकानन्त्यजाँश्च इति ख. । † पूर्वे सलिलघाती स्यादिति क्वचित् पाठः ।

तथा च वराहसंहितायाम् ।

पूर्वेण सलिलपूर्णां करोति वसुधां समागतो दैत्यः ।
पश्चात् कर्षकसेवकवोजविनाशाय निर्दिष्टः ॥
सलिलवरदन्तिघाती याम्येनोदग्गवामशुभः ।

वटकणिकायाम् ।

विदिगादिगतो हन्याद्राहुर्म्लेच्छान् सविजिगीषून् ।

वराहसंहितायाम् ।

म्लेच्छान् विदिक्स्थितो यायिनश्च हन्याद्भुताशसक्ताँश्च ।

अथ ग्रासविशेषो वराहसंहितायाम् ।

सव्यापसव्यलेह्यग्रसननिरोधावमर्दनारोहाः ।
आद्यन्तं मध्यतमस्तमोऽन्त्य इति ते दश ग्रासाः ॥

पराशरेणान्यथा दश ग्रासा दर्शितास्तद्यथा ।

देशोपद्रवा ग्रसनारोहणोपघ्राणोन्मर्दननिरोधपरिलेहनापस-
सव्यान्तमध्यतमउपप्लवाश्च—इति ।

अद्यान्तमध्य इत्येकः । तमउपप्लव इत्यपरः ।
अथैतेषां लक्षणानि फलं च । तत्र पराशरः ।

प्रदक्षिणं सव्यं प्रजाहिताय ।

मार्गवीये तु ।

प्रदक्षिणे तु सौमनस्यम् ।

वराहसंहितायां तु ।

सव्यं गते तमसि जगज्जलप्लुतं भवति मुदितमभयं च ।

पराशरः ।

अप्रदक्षिणमपसव्यं प्रजाभावाय ।

वराहसंहितायां तु ।

अपसव्ये नरपतितस्करावमर्दैः प्रजानाशः ।

पराशरः ।

समन्ताज्जिह्वयाऽभिलेहनं समानफलं पूर्वेण—इति ।

पूर्वेण निरोधेनेत्यर्थः । निरोधनान्तरस्याभिधानात् ।

वराहसंहितायां तु ।

जिह्वावलेढि परितस्तिमिरनुदो मण्डलं स यदि लेहः ।
प्रमुदितसमस्तभूप*प्रभूततोया च तत्र मही ॥

पराशरः ।

अर्धंत्रिभागपादग्रहणं ग्रसनप्रख्यातं नृपतिप्रच्युतये ।

वराहसंहितायाम् ।

ग्रसनमिति यदा त्र्यंशः पादो वा गृह्यतेऽथ वाऽप्यर्धम् ।
स्फीतनृपतिवित्तहानिः पीडा च स्फीतदेशानाम् ॥

तत्रैव ।

पर्यन्तेषु गृहीत्वा मध्ये पिण्डीकृतं तमस्तिष्ठेत् ।
स निरोधो विज्ञेयः प्रमोदकृत् सर्वभूतानाम् ॥

पराशरेण त्वन्यथा निरोधोऽभिहितः ।

सर्वमण्डलधूमावरणं निरोधस्तदारोग्यक्षेमसुभिक्षलक्षणम् ।

पराशरः ।

उन्मर्दनं चिरमर्केन्दुसकलमण्डलाक्रमणं प्रजाविद्रवकरम् ।

काश्यपस्तु ।

अवमर्दं पापमर्दात् स्वयं संक्षुभ्यते नृपः ।

वराहसंहितायाम् ।

अवमर्दनमिति निःशेषमेव संछाद्य यदि चिरं तिष्ठेत् ।
हन्यात् प्रधानभूपान् प्रधानदेशाँश्च तिमिरमयः ॥

भागवीये ।

सर्वं संग्रह्य च ज्योतिश्चिरमन्तर्दधाति च ।
हन्ति स्फीतानि राष्ट्राणि प्रधानं च नराधिपम् ॥

पराशरः ।

मण्डलमध्ये ग्रहणावर्त्तनमारोहणं नरपतिविक्षोभः प्रजानाशकरः ।

---

* प्रमुदितसमस्तभूता इति ब. ।

ग्रहणावर्त्तनमिति व्याख्यातं वराहसंहितायाम् ।

वृत्ते ग्रहे यदि तमस्तत्क्षणमावृत्य दृश्यते भूयः ।
आरोहणमित्यन्योऽन्यमर्दनैर्भयकरं राज्ञाम् ॥

काश्यपस्तु ।

आरोहे नृपसंक्षयः ।

पराशरः ।

ईषद्ग्रहणमुपघ्राणं जगद्धिताय ।

वराहसंहितायाम् ।

दर्पण इवैकदेशे सुवाष्पनिश्वासमारुतोपहतः ।
दृश्येताघ्रातं तत् सुवृष्टिवृद्ध्यावहं च जगतः ॥

काश्यपः ।

मध्ये तमसि संदृष्टे पीडयेन्मध्यदेशजान् ।

वराहसंहितायां तु ।

मध्ये तमः प्रविष्टं वितमस्कं मण्डलं च यदि परितः ।
तन्मध्यदेशनाशं करोति कुक्ष्यामयभयं च ॥

काश्यपः ।

दृष्टे तमसि पर्यन्ते शस्यानामीतिजं भयम् ।

वराहसंहितायां तु ।

पर्यन्तेष्वतिबहुलं स्वच्छं *मध्ये तमस्तमोऽन्त्याख्ये ।
शस्यानामीतिभयं भयमस्मिँस्तस्कराणां च ॥

पर्यन्ते तमोमध्ये स्वच्छमिति सम्बन्धः ।

पराशरेण त्वन्यथाऽवमर्दनग्रासावुक्तौ तद्यथा ।

मण्डलान्तर्मध्ययोर्ग्रहणमन्तर्मध्यनृपतिक्षोभकरम् । महातमसाऽऽवरणं तम उपप्लवः परस्परं म्लेच्छसङ्करकृत् ।

भार्गवीये ।

रश्मिभेदे भयं घोरमुल्लेखे मन्त्रिणां वधः ।

---

* स्वल्पम् इति ब. ।

वयसां मरणं छिद्रे प्रकीर्णे रक्षसां वधः ॥

रश्मिभेदे भिन्नरश्मितायां विरश्मित्वे इत्यर्थः । उल्लेखे रेखारूपे छिद्रे छिद्ररूपेऽथ वा प्रस्तदेशे छिद्रयुक्ते ।

अथ चिरग्राससर्वग्रासयोः फलम् । तत्र ऋषिपुत्रः ।

चिरं गृह्णाति सोमार्कौ सर्वं वा ग्रसते यदा ।
हन्यान् स्फीतान् जनपदान् वरिष्ठाँश्च नराधिपान् ॥
शस्यैर्न तत्र जीवन्ति नरा मूलफलोदकैः ।

काश्यपः ।

भयं दुर्भिक्षरोगश्च तदा जगति जायते ।
सर्वग्रस्तो यदा दृश्यो दुर्भिक्षं तत्र जायते ॥

वराहसंहितायां तु ।

सर्वग्रस्तौ दुर्भिक्षमरकदौ पापसंदृष्टौ ।

भार्गवीये ।

दर्शयित्वा तु रूपाणि यदा राहुर्न दृश्यते ।
शस्त्रशस्यान्नदुर्भिक्षैर्भयं घोरं विनिर्दिशेत् ॥

अथ वर्णफलं भार्गवीये ।

श्वेतो वर्णो ब्राह्मणानां क्षत्रियाणां तु लोहितः ।
वैश्यानां पीतको वर्णः शूद्राणां कृष्ण उच्यते ॥
एतेषां येन वर्णेन राहुश्चरति भास्करे ।
या जातिस्तस्य वर्णस्य तां तां संपीडयेद्ग्रहः ॥

भास्कर इत्युपलक्षणं चन्द्रेऽप्येतदेव फलम् ।

चन्द्रग्रहणमेवोपक्रम्य वृद्धगर्गेण वर्णफलस्य चोक्तत्वात् ।

तद्यथा ।

लोहितस्ताम्रवर्णो वा ग्रहश्चन्द्रं यदा ग्रसेत् ।
सुभिक्षक्षेमकृच्छ्रं स्यात् क्षत्रियाँश्च प्रपीडयेत् ॥
पीतकः कपिलो वाऽपि राहुर्वैश्यान्न उच्यते ।

दाहज्वरः कुक्षिरोगो मरकश्चात्र जायते ॥
तदा न वर्षेत् पर्जन्योऽन्त्यजाञ्छूद्राँश्च पीडयेत् ।
श्वेतो वा पाण्डुवर्णो वा द्विजघ्नः पार्श्वरोगकृत् ॥

विष्णुधर्मोत्तरेऽप्युपरागमात्रवर्णफलमुक्तम् । तद्यथा ।

उपरागे श्वेतरक्तः पीतकृष्णो राहुर्ब्राह्मणक्षत्रियविट्शूद्रपीडा- ७
करो भवति ।

ज्यौतिषपराशरेऽपि ।

पांशुर्ब्रह्मघ्नः । लोहितक्षत्रियविनाशाय । कृष्णः कापोतकश्च शूद्रघ्नः क्षयकुक्षिरोगाय ।

वराहेणापि सामान्येनैव वर्णफलमुक्तम् । १८

श्वेते क्षेमसुभिक्षं ब्राह्मणपीडां च निर्दिशेद्राहौ ।
पांशुविलोहितरूपे क्षत्रध्वंसाय भवति वृष्टेश्च ॥
विमलकमणिपीताभो वैश्यध्वंसी भवेत् सुभिक्षाय ।
कापोतः शूद्राणां व्याधिकरः कृष्णवर्णश्च ॥
अग्निभयमनलवर्णे पीडा च हुताशवृत्तीनाम्-इति । १७

भार्गवीये ।

धूमवर्णोऽग्निवर्णो वा ग्रामेषु नगरेषु च ।
अग्न्युत्पातं गृहस्थानां सदा स कुरुते ग्रहः ॥

बुद्धगर्गस्तु ।

धूम्रवर्णोऽग्निवर्णो वा मारीमग्निं च कोपयेत् ।

वराहसंहितायां तु ।

सार्चिष्मत्यग्निभयं गैरिकरूपे तु युद्धानि ।

अर्चिष्मान् अग्निस्तद्वति सार्चिष्मति ।

पराशरः ।

पाटलकुसुमसंकाशोऽशनिभयदो भवति ।

वराहसंहितायां तु ।

अशनिभयसंप्रदायी पाटलकुसुमोपमो राहुः ।

भार्गवीये ।

ताम्रो भवति शस्त्राय रूक्षो भवति मृत्यवे ।
नीलो लोहितपर्यन्तो राहुश्चरति भास्करे ॥
पीडयेदाहिताग्नींश्च ये चान्येऽग्न्युपजीविनः ।
यदा त्विन्द्रधनुर्वर्णो राहुश्चरति भास्करे ॥
अमात्यो हन्ति राजानं राजा वाऽमात्यमात्मनः ।

वृद्धगर्गस्तु ।

राहुरिन्द्रधनुष्प्रख्यो भयादिव्याधिवर्धनः ।
भयं घोरं विजानीयाद्रूक्षो यदि च दृश्यते ॥

पराशरः ।

बालार्कांशुकपिलो दुर्भिक्षाय ।

वराहसंहितायाम् ।

बालरविकमलसुरचापरूपभृच्छस्त्रकोपाय ।

पराशरः ।

नीलः स्तेयवृद्धये चैत्यविनाशाय । दूर्वाङ्कुरहरितो जनमरणाय । हरिद्रो व्याधये ।

वराहसंहितायां तु ।

हरिते रोगोल्वणता शस्यानामीतिभिश्च विध्वंसः ।
दूर्वाकाण्डश्यामे हारिद्राभे च निर्दिशेन्मरकम् ॥

भार्गवीये तु ।

श्यामो भवति वाताय धूम्रो भवति वृष्टये ।
हारिद्रः सर्वरोगाणां कोपं सृजति दारुणम् ॥

वराहसंहितायाम् ।

कापोतारुणकपिलश्यावाभे क्षुद्भयं विनिर्देश्यम् ।

आधूम्रे क्षेमसुभिक्षमादिशेन्मन्दवृष्टिश्च ॥

भार्गवीये ।

चक्राकारस्तु लोकानां घोरं जनयति ज्वरम् ।

स्वाभाविकवर्णानाह ब्रह्मगुप्ताचार्यः ।

"आन्त्यन्त्ययोः स धूम्रः कृष्णः खण्डग्रहेऽर्धतोऽत्यधिके । 5

ग्रासः कृष्णाताम्रः सर्वग्रहणे कपिलवर्णः*" ॥

अथाङ्गारकादीनां ग्रहराशिस्थितफलं च वराहसंहितायाम् ।

आवन्तिका† जनपदाः कावेरीनर्मदातटाश्रयिणः ।

दृष्टाश्च मनुजपतयः पीड्यन्ते क्षितिसुते ग्रस्ते ॥

ग्रस्ते ग्रहणराशिस्थिते । न तु चन्द्रादित्यवद्ग्रस्ते । चन्द्रग्रहणे छादिकाया भूच्छा- 10
याया भौमकक्षापर्यन्तमनुत्थानात् ।

भूच्छायापरिमाणम् ।

खतिथिनगानलेलोचन-२३७१५०

योजनदीर्घा च भवति भूच्छाया ।

स्पृशति च बुधकक्षोपरि 15

गजरसनृपयमशैल-७२१६६८योजनान्येव ॥

रविग्रहे च सूर्यासन्नस्थानां ग्रहाणामस्तमितत्वाद्ग्रहणादर्शनात् । न च गणिता-
नुमानमात्रेण ग्रहणफलं भवति ।

अत एव ग्रहसहितत्वमात्रमुक्तं वटकणिकायाम् ।

सहितो ग्रहेण येन च तद्देशश्चाप्नुयात् पीडाम् । 20

वराहसंहितायाम् ।

अन्तर्वेदीं सरयूं नेपालं पूर्वसागरं शोणम् ।

स्त्रीनृपयोधकुमारान् सह विद्वद्भिर्बुधो हन्ति ॥

ग्रहणोपगते जीवे विघ्नं नृपमन्त्रिगजहयध्वंसः ।

---

* ब्रह्मसिद्धान्ते चन्द्रग्रहणाधिकारस्य १२ श्लो. । तत्र 'ग्रासे स कृष्णाताम्र' इति ।

† आवन्तका इति ए. ।

सिन्धुतटवासिनामप्युदग्दिशं संश्रितानां च ॥
भृगुतनये राहुगते दशार्णकाः कैकयाः सयौधेयाः ।
आर्यावर्त्ताः शिवयः स्त्रीसचिवगणाश्च पीड्यन्ते ॥

बुधभार्गवयोगफलं सूर्यग्रहण एव बोद्धव्यम् । चन्द्रग्रहणे तद्योगासम्भवात् ।

सौरे मरुभवपुष्करसौराष्ट्रकधातवोऽर्बुदान्त्यजनाः ।
गोमन्तपारियात्राश्रिताश्च नाशं व्रजन्त्याशु ॥

अथ ग्रहदृष्टिफलं वराहसंहितायाम् ।

पश्यन् अस्तौ* सोम्यो घृतंमधुतैलक्षयाय राज्ञां च ।

यदा रविचन्द्रौ अस्तं भवतस्तदा ग्रहैर्दर्शनादेतानि फलानि भवन्तीति व्याख्येयम् । पश्यन्तीति यथासम्भवं सम्बन्धनीयम् । तत्र सोम्यश्चन्द्रं पश्यन्निति सम्बन्धः । बुधस्यादित्यदर्शनासम्बन्धत्वादिति ।

भौमः समरविमर्दं शिखिकोपं तस्करभयं च ।
शुक्रः शस्यविमर्दं नानाक्लेशं च जनयति धरित्र्याम् ॥
रविजः करोत्यवृष्टिं दुर्भिक्षं तस्करभयं च ।

यदशुभमवलोकनाभिरुक्तं ग्रहजनितं ग्रहणे प्रमोक्षणे वा ।
सुरपतिगुरुणाऽवलोकिते तच्छममुपयाति जलैरिवाग्निरिद्धः ॥

अथ हीनातिरिक्तवेलाफलम् । तत्र गर्गः ।

वेलाहीने शस्त्रभयं गर्भाणां श्रवणं तथा ।
अतिवेले फलानां तु शस्यानां क्षयमादिशेत् ॥

वराहसंहितायां तु ।

वेलाहीने पर्वणि गर्भविपत्तिश्च शस्त्रकोपश्च ।
अतिवेले कुसुमफलक्षयो भयं शस्यनाशश्च ॥

काश्यपस्तु ।

अनागतमतीतं वा वेलाहीनाधिकं च यत् ।
गर्भस्रावस्त्वनावृष्टिः फलं पुष्पं विनश्यति ॥

---

* अस्तम् इति क. । न तत्र सूर्यचन्द्रयोः कश्चिद्विशेषोऽर्थोऽभिहितः ।

अथ खांशफलम् । तत्र दृश्यनभोभागं त्रिधा विभज्य फलमुक्तं भार्गवीये ।

यौवनस्थाँश्च पूर्वांङ्गे हन्ति यज्ञविदाञ्जनान् ।
औदकानि च सत्त्वानि नागेन्द्रश्चात्र दुःखितः ॥
अथ मध्यपथं प्राप्तः शूद्रान् हन्ति सतस्करान् ।
उपरक्तो नृपं हन्ति चन्द्रश्च वरवारणात् ॥
प्रलम्बः प्रमदां हन्ति क्षत्रं राष्ट्रं च सर्वशः ।
त्रिगर्त्ताश्चात्र पीड्यन्ते मत्स्याश्च कुरवो जनाः* ॥

षटकणिकायाम् ।

पीडयति विप्रराजन्यसत्रिनृपवैश्यशूद्रदस्युगणान् ।
खांशेष्वसुरः सप्तसु दृष्टो नष्टः शिवायोक्तः ॥

वृद्धगर्गस्तु ।

गवां तु प्रथमं क्षेत्रं द्वितीयं ब्रह्मवादिनाम् ।
क्षत्रियाणां तृतीयं स्यान्मध्यमं सार्वलौकिकम् ॥
पञ्चमं पुरवैश्यानां षष्ठं स्याच्छूद्रयोषिताम् ।
सर्वासामन्त्यजातीनां सप्तमं क्षेत्रमुच्यते ॥
येषां सोमो युगे ग्रस्तो विमर्दो यत्र वा भवेत् ।
तेषां पीडां विजानीयान्मोक्षे क्षेममथादिशेत् ॥

काश्यपस्तु ।

प्रथमांशे विप्रपीडा क्षत्रियाणां द्वितीयके ।
तृतीये चान्त्यजानां तु चतुर्थे मध्यदेशजान् ॥
वैश्यानां पञ्चमे खांशे षष्ठांशे प्रमदाभयम् ।
दस्युप्रत्यन्तिकान् म्लेच्छान् नाशयेत्† सप्तमांशके ॥
येषामंशे भवेन्मोक्षस्तज्जातीनां शुभं वदेत् ।

---

* ये च दण्डभृतो जनाः इति ब. । † प्रत्यन्तम्लेच्छविनाशः इति अ. ।

हन्तीत्यनुवृत्तौ वराहसंहितायां तु ।

अग्नुपजीविगुणाधिकविप्राश्रमिणोऽयुगाभ्युदितः ।
कर्षकपाखण्डवणिक्क्षत्रियबलनायकान् द्वितीयांशे ॥

अयुगाभ्युदितः प्रथमांशोदितः ।

विनाशाय ग्रहणमित्यनुवृत्तौ पराशरः ।

क्षत्रियबलाध्यक्षयोर्मध्याभिलाषिणः—इति ।

मध्याभिलाषी तृतीयखांशस्थः ।

वराहसंहितायां तु ।

कारुकशूद्रान् म्लेच्छाँस्तृतीयखांशे च मज्जिनान् ।

पराशरः ।

श्वेतभवानां मध्यप्राप्तस्य ।

वराहसंहितायां तु ।

मध्यांशे नरपतिमध्यदेशहा शोभनश्च धान्यार्घः ।

मध्याह्नरेखायां विशेषमाह वृद्धगर्गः ।

नभोमध्यगतो राहुः सोमे सूर्येऽथ वा स्थितः ।
प्रजानामथ राज्ञां च भयं कुर्याद्विसर्पतः ॥

पञ्चमषष्ठसप्तमखांशफलमाह पराशरः ।

चतुर्थात् किञ्चिदावृत्तस्य क्षत्रियस्त्रीणां व्यालम्बितस्य शूद्रतस्कराणामस्तमये ।

वराहसंहितामाम् ।

तृणभुगमात्यान्तःपुरवैद्यघ्नः पञ्चमे खांशे ।
स्त्रीशूद्रान् षष्ठेऽंशे दस्युप्रत्यन्तहाऽस्तमयकाले ॥
यस्मिन् खांशे मोक्षस्तत्रोक्तानां फलं भवति ।

अथ ग्रस्तोदयास्तफलम् । तत्र काश्यपः ।

उदितास्तमितौ ग्रस्तौ सर्वशस्यक्षयङ्करौ ।

वराहसंहितायाम् ।

ग्रस्तावुदितास्तमितौ शारदधान्यावनीश्वरक्षयदौ ।

हरिवंशे च कंसवधनिमित्तम् ।

"ग्रस्तः स्वर्भानुना सूर्यो दिवा नक्तमजायत"* ।

पराशरस्तु ।

गृहीतो यद्युदागच्छेदस्तं वा यदि गच्छति ।
अयोगक्षेममाचष्टे त्रीणि वर्षाण्यसंशयम् ॥

बार्हस्पत्ये तु ।

गृहीतो राहुणा सार्धमुत्तिष्ठति यदा शशी ।
तदा धर्मपरिक्षीणा कलिमाविशति प्रजा ॥
अमुक्तो राहुणा सार्धमस्तं गच्छति चन्द्रमाः ।
तदा तमोमयस्तस्मान्मृत्युमाविशति प्रजा ॥

वृद्धगर्गस्तु ।

गृहीतो यद्युदागच्छेदस्तं वा यदि गच्छति ।
शारदं तु तदा शस्यं जातमात्रं विपद्यते ॥
ग्रैष्मेण तत्र जीवन्ति नरा मूलफलेन वा ।
भयदुर्भिक्षरोगैश्च तदा संक्षिप्यते जगत् ॥

भार्गवीये ।

गृहीतो यद्युदागच्छे द्यदि वा प्रतितिष्ठति ।
अयोगक्षेम आदेश्यस्त्रिषु लोकेषु दारुणः ॥

प्रतितिष्ठत्यस्तमेति ।

शारदं त्रीणि वर्षाणि शस्यजातं न पच्यते ।
निदाघेनात्र जीवन्ति प्रजा मूलफलेन वा ॥

आदित्यस्य ग्रस्तोदयास्तमये विशेषो बार्हस्पत्ये ।

पराजितो राहुनिपीतमण्डलो विवर्णभावाधिगतोऽपि #निष्प्रभः ।
यदाऽस्तमायाति हि वै दिवाकरस्तदाऽऽशु विद्यात् तु महज्जनक्षयम् ॥

---

* २३ अ. ३१ श्लो. । † तमोग्रस्तो यदोदेति इति च. ।
# विवर्णसन्ध्याधिगतोऽपि इति च. ।

पराजितो ग्रस्यमानः । निष्प्रभमण्डलः सर्वग्रस्तः ।
अथार्धोदयास्तग्रहणफलम् । तत्र पराशरः ।

यज्ञनैकृतिकविनाशायार्धोदितग्रहणम् ।

वराहसंहितायां च ।

अर्धोदितोपरक्तो नैकृतिकान् हन्ति सर्वयज्ञाँश्च ।

भार्गवीये तु ।

उदितो गृह्यमाणश्च हन्ति वेदविदो जनान् ।
बालाँश्च जटिलान् हन्ति ये च काषायवाससः ॥

ऋषिपुत्रस्तु ।

उदयेऽस्तमये वाऽपि सूर्यस्य ग्रहणं भवेत् ।
तदा नृपभयं विद्यात् परचक्रस्य चागमम् ॥

अथोदितग्रहणफलम् । तत्र वृद्धगर्गः ।

उदितो गणमुख्याँश्च ब्राह्मणाँश्चापि पीडयेत् ।

उदितो नीललोहितः ।

विनाशाय ग्रहणमित्यनुवृत्तौ पराशरस्तु ।

गुणाधिकगणमुख्यानामुदितस्य ।

सन्ध्याग्रहणफलम् । तत्र वृद्धगर्गः ।

सन्ध्याकाले तु गर्भस्था गृहीतः पीडयेत् प्रजाः ।
गावो गर्भं विमुञ्चन्ति न च वर्षेत् पुरन्दरः ॥

सन्ध्यापरिमाणं सन्ध्यालक्षणं च वक्ष्यामः ।
अथ मोक्षलक्षणम् । तत्र पराशरः ।

षड्विधो मोक्षो वामदक्षिणच्छर्दनाभिनिर्वहणान्तमध्यो नृपक्षयाभिवर्षणसुभिक्षशस्त्रकोपमध्यजनाक्षेमशरच्छस्यनाशकरः ।

इति मोक्षषट्कस्य क्रमेणैतानि फलानि ।
वराहसंहितायां तु ।

हनुकुक्षिपायुभेदा द्विर्हिः संछर्दनं च मरणं च ।
मध्यान्तयोर्विदरणमिति दश शशिसूर्ययोर्मोक्षाः ॥

अस्यार्थः । हनुभेदादयस्त्रयो द्विर्द्विर्द्विधाकारा भवन्ति । दक्षिणो वामश्च मध्यान्तयोश्च विदारणमिति मध्यविदारणमन्तविदारणं च ।

काश्यपः ।

दक्षिणे हनुभेदः स्यादाग्नेय्यां यदि गच्छति ।
शस्यनाशं च कुरुते नृपभङ्गं सुदारुणम् ॥

वराहसंहितायां तु ।

आग्नेय्यामपगमनं दक्षिणहनुसंज्ञितं शशिनः ।
शस्यविमर्दो मुखरुग्नृपपीडा स्यदवृष्टिश्च ॥

काश्यपः ।

पूर्वोत्तरहनुभेदो* नृपपुत्रवधप्रदः ।

वराहसंहितायां तु ।

पूर्वोत्तरे णवामो हनुभेदो नृपकुमारभयदायो ।
मुखरोगः शस्त्रभयं तस्मिन् विन्द्यात् सुभिक्षं च ॥

काश्यपः ।

दक्षिणः कुक्षिभेदः स्याद्याम्ये मोक्षो भवेद्यदि ।
राजपुत्रभयं तत्र दक्षिणाशापतेर्वधः ॥

वराहसंहितायां तु ।

दक्षिणकुक्षिविभेदो दक्षिणपार्श्वे यदि भवेन्मोक्षः ।
पीडा नृपपुत्राणामभियोज्या दाक्षिणा रिपवः ॥

काश्यपः ।

सौम्यायां त यदा मोक्षो वामकुक्षिविभेदनम् ।
स्त्रीणां गर्भविनाशाय सौम्याशाधिपतेर्भयम् ॥

वराहसंहितायां तु ।

वामस्तु कुक्षिभेदो यद्युत्तरमार्गसंस्थितो राहुः ।
स्त्रीणां गर्भविपत्तिः शस्यानि च तत्र मध्यानि ॥

* पूर्वोत्तरेऽपरो भेदः इति अ, ।

काश्यपः ।

पायुभेदगतो राहुर्वायव्यो निर्ऋताश्रयः ।
गुदरोगभयं विन्द्याद्वामे राज्ञोभयं भवेत् ॥

वायव्यो मोक्षो पायुभेदो नैर्ऋत्यो दक्षिणः । उभयोरेव गुदारोगफलं पायुभेदत्वात् । वामे तु राज्ञोभयमधिकम् ।

तथा च वराहसंहितायाम् ।

नैर्ऋतवायव्यस्थौ दक्षिणवामौ तु पायुभेदौ द्वौ ।
गुह्यरुगल्पा वृष्टिर्द्वयोस्तु राज्ञीक्षयो वामे ॥

काश्यपः ।

ग्रासो मोक्षो यदा पूर्वे छर्दनं तु तदा भवेत् ।
क्षेमहार्दिप्रदो ज्ञेयः शस्यनिष्पत्तिकारकः ॥

वराहसंहितायां च ।

पूर्वेण ग्रग्रहणं कृत्वा प्रागेव चापसर्पेत ।
संछर्दनमिति तत् क्षेमशस्य हार्दिप्रदं जगतः ॥

काश्यपः ।

पूर्वेण ग्रसते राहुरपरस्यां विमुञ्चति ।
क्षुत्तस्करभयं* तत्र मोक्षस्तु जरणं स्मृतम् ॥

वराहसंहितायां च ।

प्राक् ग्रग्रहणं यस्मिन् पश्चादपसर्पणं तु तज्जरणम् ।
क्षुच्छस्त्रभयोद्विग्ना न शरणमुपयान्ति तत्र जनाः ॥
मध्ये यदि प्रकाशस्तन्मध्यविदारणं नाम ।
अन्तःकोपकरं स्यात् सुभिक्षदं नातिवृष्टिकरम् ॥

तदिति वृष्टिकरं सुभिक्षदं न भवति । दुर्भिक्षमेव करोतीत्यर्थः ।

तथा च काश्यपः ।

यदा प्रकाशते मध्ये दुर्भिक्षमरकौ तदा ।

पराशरेण चाऽस्य शस्यच्छदनाशकत्वमात्रमुक्तम् । तद्वचनं प्रागेव लिखितम् ।

---

* क्षुधाशस्त्रभयम् इति वराहसम्मतः पाठः ।